# अष्टमं सोपानम्

### अ) वृक्षायुर्वेदः

वृक्षायुर्वेदः इति नाम अग्निपुराणे (२८२ अध्यायः), बृहत्संहितायां (५४) च विशेषतया दृश्यते। तत्तु विशिष्टपुस्तकरूपेण सुरपालः विश्ववल्लभश्च निर्मितवन्तौ। सुरपालस्य कालः ७ ए.डी. तः १४ ए.डी. पर्यन्तं विविधप्रकारेण भिद्यते। परं सामान्यतया ११ ए.डी. इति स्वीकृतं वर्तते। अग्रि हिष्टरि फौण्डेशन एष्यन् कृषि - इतिहास केन्द्रम् - भाग्यनगरं १९९६ तमे वर्षे एतस्य हस्तलिखितपुस्तकस्य प्रकाशनमॅ अकुरुत। [२६] ३२५ श्लोकयुक्तस्य अस्य पुस्तकस्य प्रतिकृतिं ते इंग्लेन्ड ब्रोडलियन ग्रन्थालयात् प्राप्तनुवन्। अत्रत्याः विषयाः बृहत्संहिताः बहूनां विषयाणां च समानता अस्ति। वृक्षायुर्वेदः, कुसुमलता, दकार्गलम् , वास्तुविद्या, मृत्, वृक्षारोपणं, दोहदः, रोगाः चिकित्सा , उद्यानानि ,इत्येतेषां विषये आधिक्येन ग्रन्थेऽस्मिन् विवरणं दृश्यते। ए.डी. १६ शतके चक्रपाणिमिश्रेण विरचितः वृक्षायुर्वेदोऽपि बहुषु विषयेषु समानताम् एति [२७]। उपवनक्रिया कूपार्थंभूमिपरीक्षा अपि ग्रन्थेऽस्मिन् विषयकृतो दृश्यते। वात-पित्त- कफ-दोषदिशा वृक्षाणां भेदाः, रोगाः तन्निवारणमार्गाश्च वर्तन्तेऽस्मिन् ग्रन्थे।

### ब) दकार्गलम्-

वास्तुनिरुपवान्तरं दर्कगल विषयंक शास्त्रीय विवेचनं ग्रन्थकारेण कृतम्। आरम्भे एव दर्कागल शब्दस्य अयं निस्त्र्ययं आचार्य वराहमिहिराः आह दर्कागलं धर्मपूर्वं तथा यशोदायकं वर्तत।

येन मार्गेण जलस्य उपलब्धिः भवति तद् दकार्गलं इति उच्यते। यथा पुरुषस्य शरीरे अनेकाः शिराः प्रस्तुता : संति तथा भूमेः अर्न्तभार्गे अनेकाः जलधारिण्यः शिराः वर्तन्ते। आकाशात केवलं एक स्वाद् युक्तं जल वर्षति किन्तु, भूमौ यदा तद् जलं पतति तदा भूमेः वर्वादि अनुसारिया तद जलं विविध स्वाद् युक्तं भवति। तस्य विस्तृतं विवेचनं अत्र कृतम्।

### क) रत्न परीक्षणविषये:

विस्तरेण ग्रन्थकृता विवेचनं कृतम्। किं नाम। त्नम रमन्ते अस्मिन जनाः इति रत्नम्। शुभरत्न धारणेन नृपाणं सर्वं शुभं भवति। तथा अशुभरत्न धारणेन अशुभं भवति। अतः नृपैः रत्न पंडितैः रत्नगत देवानो शुभाशुभ परीक्षणं अवश्यं कर्तव्यम्। अजयकोषानुंषारेण "जातौ जातौ" यदुकृष्टं तद् रत्नं अभिधीयते यथा गांधिमहात्मानर रत्नम्, पद्मिनी स्त्रीरत्नम् इत्यादि प्रयोगाः लक्षणया भवन्ति। वराहमिहिरः प्रकरणस्य आरंभे लिखति यत् अत्र वयं पाषाण निर्मित रत्नानां परीक्षण विषये विवेचनम् कष्यिामः न तु अन्येषां रत्नानां विषये।

## १. वृक्षायुर्वेदाध्यायः

तत्रादावेव प्रयोजनप्रदर्शनार्थमाह-

**प्रान्तच्छायाविनिर्मुक्ता न मनोज्ञा जलाशयाः।**
**यस्मादतो जलप्रान्तेष्वारामान् विनिवेशयेत्।।१।।**

यस्माज्जलाशया उदकाधारा वापीकूपतडागाः, प्रान्तच्छायाविनिर्मूक्ताः पर्यन्तच्छाया-विरहिता मनोज्ञाश्चित्ताह्लादका न भवन्ति। अतस्तस्माज्जलप्रान्तेषूदकपर्यन्तेष्वारामान् विशेषेण विनिवेशयेत् कारयेत्। आरमन्तेऽस्मिन्नित्यारामो वृक्षवाटिकेत्यर्थः।।

अथ तत्र भूलक्षणमाह-

**मृद्वी भूः सर्ववृक्षाणां हिता तस्यां तिलान् वपेत्।**
**पुष्पितांस्तांश्च मृद्नीयात कर्मैतत् प्रथमं भुवः।।२।।**

सर्ववृक्षाणां मृद्वी मधुरा कोमला भूः अवनिः हिता हितवहा शोभनेत्यर्थः। तस्यां भूमौ प्रथमं तिलान् वपेद उप्यात्। तांस्तिलान् पुष्पितान् सञ्जातकुसुमान् मृद्नीयादुपमर्दयेत्। एतद्भुवो भूमेः प्रथमपादौ कर्म कार्यम्। तथा च काश्यपः- **बृ.सं., पृ-११०**

इतिहासरचनायाः कालः इत्युक्ते आत्रेतायुगकलियुगम् इति वक्तुं शक्यते। आधुनिकवैज्ञानिकेषु विविधानि मतानि सन्ति तत्तु बी.सी. ६००० तः बी.सी. २००० पर्यन्तं भवति। तस्मिन् मतभेदो भवति चेदपि तेषु विद्यमानानां अन्तर्गतानां विज्ञानविषये न कस्यापि विप्रतिपत्तिः।

अधुना प्रथमरोप्यान् वृक्षानाह-

**अरिष्टाशोकपुन्नागशिरीषाः सप्रियङ्गवः।।**
**मङ्गल्याः पूर्वमारामे रोपणीया गृहेषु वा।।३।।**

अरिष्टः, अशोकः, पुन्नागः, शिरीषः- एते वृक्षविशेषाः। किम्भूताः? सप्रियङ्गवः प्रियङ्गवृक्षेण सहिताः, मङ्गल्याः प्रशस्ताः, पूर्वं प्रथममारामे रोपणीयाः। गृहेषु वा पूर्व प्रथमं गृहेषु रोपणीयाः। तथा च काश्यपः-

अधुना काण्रोप्यायां विधानमाह-

**पनसाशोककदलीजम्बूलकुचदाडिमाः।**
**द्राक्षापालीवताश्चैव बीजपूरातिमूक्तकाः।।४।।**

**एते द्रुमाः काण्डरोप्या गोमयेन प्रलेपिताः।**

**मूलोच्छेदेऽथवा स्कन्धे रोपणीयाः परं ततः।।५।।**

पनसः। अशोकः कदलीः। जम्बूः। लकुचः। दाडिमः। द्राक्षा। मृद्वी। पालीवतश्चोचः। बीजपूरो मातुलुङ्गः। अतिमुक्तक- एते पनसादयो द्रुमा वृक्षाः काण्डरोप्याः। काण्डाः शाखास्तान् गोमयेन प्रलिप्य रोपयेत्। ततोऽनन्तरं पर प्रकृष्टं मूलोच्छेदे अथवा स्कन्धे रोपणीयाः। अन्यवृक्षस्य मूलोच्छेदं कृत्वा तस्य छिन्नमूलस्योपरि विजातीयो वृक्षो रोपणीयः। अथवा स्कन्धादर्द्धादन्यवृक्षं छित्त्वा तस्य स्कन्धमुत्कीर्य विजातीयो वृक्षो रोपणीयः। तत्र मृत्तिकाश्लेषं दापयेदिति। तथा च काश्यपः- **बृ.सं., पृ-१११**

भारतीयचिकित्साविज्ञाने ज्यौतिषाशास्त्र-वनस्पतीनां महत्त्वम् इत्यास्मिन् लेखने डॉ.कामेश्वरशुक्लः एवं सूचयति - रामायणे तथा महाभारतेऽपि वनस्पतीनां महत्त्वस्य वर्णनं प्राप्यते। किन्तु इदमत्र उल्लेखनीयमस्ति यत् रामायणे वर्णिताः वनस्पतयः वेदेषु महाभारते च वर्णितानां वनस्पतीनां तुलनया नितान्तं परिचिताः प्रचलिताः च वर्तन्ते। उदाहरणार्थं रामायणे वर्णिताः कदम्ब- निम्ब- कुटज- अर्जुन- अशोक- असन- सर्जादिवनस्पतयः उल्लेखमर्हन्ति।[1]

अथ वृक्षाणां कालनियामर्थमाह-

**अजातशाखान् शिशिरे जाताशाखान् हिमागमे।**

**वर्षागमे च सुस्कान्धान् यथादिक्स्थान् प्ररोपयेत्।।६।।**

अजातशाखानाजातलताङ्कुरान् वृक्षान् शिशिरे माघे फाल्गुने च रोपयेत्। जातशाखानं हिमागमे हेमन्ते मार्गशीर्षे पौषे च रोपयेत्। सुस्कन्धान् महाशाखायुक्तान् वर्षागमे प्रावृटकाले श्रावणे भाद्रपदे च रोपयेत्। केचित् "जातशाखान् घनागमे वर्षागभें च सुस्कन्धान " इति पठन्ति। घनागमे वर्षाप्रारम्भे। वर्षागम्भे वर्षामध्यभागे इति। तांश्च यथादिकस्थान् पूर्वमन्यस्थानतस्तस्य तरोर्या पूर्वा दिगाशा साऽन्यत्र रोपितसय पूर्वैव कार्या। एवं सर्वासों दिशामानुलोम्यं वाच्यम्। तथा च काश्यपः- **बृ.सं., पृ-११२**

अन्यदप्याह-

**घृतोशीरतिलक्षौद्रविडङ्गक्षीरगोमयैः।**

**आमूलस्कन्धलिप्तानां संक्रामणविरोपणम्।।७।।**

---

१. भारतीयचिकित्साविज्ञाने वनस्पतीनां महत्त्वम् - आमुखम्

घृतमाज्यम् उशीरं प्रसिद्धम् तिलाः, क्षौद्रं माक्षिकम्, विडङ्ग, क्षीरं गोक्षीयम्, गोमयं गोशकृद् - एतैर्घृतादिभिरामूलस्कन्धलिप्तानां मूलात् प्रभृति शाखान्तं यावद् लिप्तानां वृक्षाणां संक्रामणविरोपणम्। संक्रामणं देशान्तरनयनम्। अन्यदेशे नीत्वा रोपयेदित्यर्थः। तथा च-

अथ रोपणिवाधनमाह-

**शुचिर्भूत्वा तरोः पूजां कृत्वा स्नानातुलेपनैः।**

**रोपयेद्रोपितश्चैव पत्रैस्तैरेव जायते।।८।।**

शुचिः समाहितो भूत्वा तरोर्वृक्षस्य स्नानानुलेपनैः स्नानेनानुलेपनेन पूजामर्चां कृत्वा विधाय रोपयेत्। एवमनेन प्रकारेण रोपितश्च तैरेव पत्रैर्यैर्युक्तो रोपितस्तैः सह जायते न शुष्यति।।८।।

आदिकाव्ये रामायणे[1] आश्रमाणां विवरणे अयोध्यावर्णने, अन्येषु सन्दर्भेषु च विशेषतया सस्यानामुल्लेखो वर्तते। आश्रमादिषु वृक्षलतादयः भवन्ति इति तु सामान्यं तथा स्वाभाविकं चेदपि ते विशिष्टाः वृक्षाः भवेयुरिति भावना विचारश्च तत्र तत्र दृश्यते।

अधुना रोपितानां सेकविधानमाह-

**सायं प्रातश्च घर्मर्तौ शीतकाले दिनान्तरे।**

**वर्षासु च भुवः शोषे सेक्तव्या रोपिता द्रुमाः।।९।।**

रोपिता द्रूमा वृक्षा घर्मर्तौ ग्रीष्मे सायं प्रातश्च सेक्तव्याः। सायमपराह्ने प्रातः पूर्वाह्ने। शीतकाले हेमन्ते शिशिरे च दिनान्तरे च। दिनं दिनमन्तरे मध्ये कृत्वा सेक्तव्याः। वर्षासु च वर्षासमये। भुवः शोषे यदा यदा भूः शुष्यति, तदा तदा च सेक्तव्याः।।९।।

अथानूपजान् वृक्षानाह-

**वञ्जुलो नक्तमालश्च तिलकः पनसस्तथा।**

**तिमिरोऽम्रातकश्चेति षोडशानूपजाः स्मृताः।।१०, ११।।**

जम्बूः, वेतसः, वानीरः, कदम्बः, उदुम्बरः, अर्जुनः, बीजपूरको मातुलुङ्गः, मृद्वीका द्राक्षाः, लकुचः - एते सदाडिमा दाडिमेन सहिताः। वज्जुलः नक्तमालश्च, तिलकः, पनसः। तथा तेनैव प्रकारेण तिमिरः अम्रातकः। चशब्दः समुच्यते। इत्येवंप्रकाराः षोडश वृक्षा अनुपजा अनूपे बहूदके जायन्ते।।

---

१. रामायणम् अयोध्याकाण्डम् - ९४.८.१०.२१,२४

अथ वृक्षाणां रोपितानां किं प्रमाणमन्तरं कार्यमित्येतत्प्रतिपादनायाह-

**उत्तमं विंशतिर्हस्ता मध्यमं षोडशान्तरम्।**

**स्थानात् स्थानान्तरं कार्यं वृक्षाणां द्वादशावरम्।।१२।।**

वृक्षाणां स्थानात् स्थानात् प्रदेशात् प्रदेशाद्यदन्तरं विंशतिर्हस्ता वृक्षस्य समन्ततस्तदुत्तमं प्रमाणम्, यच्चानन्तरं षोडशहस्तान्तरं तन्मध्यममढ, यदनन्तरं द्वादशहस्तान्तरं तदवरं निकृष्टमित्यर्थः। एतदुक्तं भवति- यत्रैको वृक्षो रोपितस्तस्माद्विंश-तिकेऽन्तरे षोडशके वा अन्यद्रोपणी-यमिति। तथा च काश्यपः- **बृ.सं., पृ-११३**

तथैव युद्धसमये लक्ष्मणस्य संज्ञालाभार्थं सञ्जीवनीनामकस्य वनस्पतेः वर्णनसमये - वैद्यः सुषेणः पर्वतवर्णनं यथा करोति तेन ज्ञायते तस्मिन् कालेऽपि हिमालयः अमूल्यवनस्पतीनां निधानम् आसीत् इति।

**विशल्यकरणीं नाम्ना सावर्ण्यकरणीं तथा।**

**सञ्जीवकरणीं वीरसंधानीं च महौषधिम्।।**[१]

किमिति तेषां मध्येऽन्तरं क्रियत इति तदर्थमाह-

**अभ्यासजातास्तरवः संस्पृशन्तः परस्परम्।**

**मिश्रैर्मूलैश्च न फलं सम्यग्यच्छन्ति पीडिताः।।१३।।**

य तरवो वृक्षा अभ्यासजाताः सन्निकर्षसम्भूताः परस्परमन्योन्यं संस्पृशन्तः मिश्रैश्च परस्परं संलग्नैर्मूलैः पीडिता भवन्ति। अतस्ते सम्यक् फलं न यच्छन्ति न ददति।।

अथ तेषां रोगज्ञानमाह-

**शीतवातातपै रोगो जायते पाण्डुपत्रता।**

**अवृद्धिश्च प्रवालानां शाखाशोषो रसस्त्रुतिः।।१४।।**

शीतने वातेनातपेन च रोगस्तेषां जायत उत्पद्यते, तथा पाण्डुपत्रता पर्णानां पाण्डुत्वम्, प्रबाला-नामङ्कुराणावृद्धिरसमृद्धिः, शाखानां शोषो नीरसता, रसस्य च स्त्रुतिः स्त्राव एतैश्चिह्नैस्तरुः सरोगो ज्ञेयः। एवम् औषधशक्तिः वनस्पतिषु वर्तते इति ज्ञानं रामायणकालेऽपि आसीत् इत्यादयः विषयाः अपि ज्ञायन्ते।।

---

१. रामायणम् यद्धकाण्डम् - १०१/ २९-३२

अथैतेषां चिकित्सितमाह-

**चिकित्सितमथैतेषां शस्त्रेणादौ विशोधनम्।**

**विडङ्गघृतपङ्काक्तान् सेचयेत् क्षीरवारिणा।।१५।।**

अथानन्तरमेतेषां वृक्षाणां चिकित्सिंतं भवति। आदौ प्रथमं शस्त्रेण व्रणादिविशोधनं कार्यम्। यद्विवर्ण क्लिंन्नमवयवं तच्छस्त्रेण निवर्तयेत्। विडङ्गः, घृतमाज्यम्, पङ्कः, कर्दमः एतैरेकीकृतैः आक्तानत्यन्तं लिप्तान् कुर्यात्। ततः क्षीरवारिणा क्षीरसंयुक्तेतन जलेन सेचयेत्। एवं कृते नीरुजा भवन्ति। तथा च काश्यपः- **बृ.सं., पृ-११४**

अथ फलनाशचिकित्सितमाह-

**फलनाशे कुलत्थैश्च माषैर्मुद्गैस्तिलैर्यवैः।**
**श्रृतशीतपयः सेक, फलपुष्पसमृद्धये।।१६।।**

वृक्षाणां यदा फलनाशो भवतिः, तदा कुलत्थैर्माषैर्मुद्गैस्तिलैर्यवैः। एतैः सह श्रृतशीतपयः श्रृतं क्वथितं तदेव पश्चाच्छीतं पयः क्षीरं कृत्वा तेन पयसा फलानां पुष्पाणां चातिवृद्धये सेकः कार्य इति।।१६।।

महाभारतेऽपि वनस्पतिशास्त्रसम्बन्धविषयाः बहवः सन्ति। सस्यानां जीवोऽस्ति, सस्यानां गणविभागः, मूलैः सस्यानि जलादिकानाम् आगिरणं कुर्वन्ति इत्यादयो विषयाः महाभारते दृश्यन्ते। सस्यानां विभागीकरणं वृक्ष गुल्म- लतादिभेदेन निरूप्यते।

अथ वृद्धयर्थप्रयोगमाह-

**सप्तरात्रोषितैरेतैः सेकः कार्यो वनस्पतेः।**
**वल्मीगुल्मलतानां च फलपुष्पाय सर्वदा।।१७, १८।।**

अविका प्रसिद्धा मेषजातिः, अजश्छागः, अविकाजयोः शकृत् पुरीषः तच्चूर्णस्य द्वे आढके। अविकशकृच्चूर्णस्याढकमजशकृच्चूणृस्याढकम्। आढकश्चतुःषष्टिपलानि, तिलानामाढकम्, सक्तुप्रस्थः, प्रस्थः, षोडशपलानि, जलस्य द्रोणः , द्रोणः पलशतद्वयं षट्पञ्चाशदधिकम्। एतत्सर्वं गोमांसतुलया सह। तुला पलशतम्। उक्तं च-

एवं तन्मध्ये गोमांसस्य गोपिशितस्य तुला देया। पलशतमित्यर्थः। एतैः सर्वैरेकीकृतैः सप्तरात्रोषितैः सप्ताहमुषितैः। वनस्पतेर्वृक्षस्य वल्लीनां लतानां च फलानां चातिवृद्धयर्थं सर्वदा सर्वकालं सेकः कार्यः। एतत् प्रमाणमेकस्य वृक्षस्यानेनानुसारेण बहूनां कार्यम्। तथा च काश्यपः- **बृ.सं., पृ-११६**

**स्थावराणां च जन्तूनां जातयः षट् प्रकीर्तिताः।**

**वृक्षगुल्मलतावल्ल्यस्तबकसारास्तृणजातयः।।[1]**

**'सर्वकामफलाश्चापि वृक्षा भवनसंस्थिताः।'[2]**

**कथं सस्यानि उपकुर्वन्ति इत्यपि सूच्यतेऽत्र-**

**पुष्पै : सुरगणान् वृक्षाः फलैश्चापि तथा पितृन्।**

**छायया चातिर्थि तात पूजयन्ति महीरूहः।।[3]**

अधुना बीजानां वापनविधानमाह-

**मांससूकरवसासमन्वितं रोपितं च परिकर्मितावनौ।**

**क्षीरसंयुतजलावसेचितं चायेत कुसुमयुक्तमेव तत्।।१९, २०।।**

यस्य कस्चिचिद् वृक्षस्य बीजं दश वासराणि दश दिनानि दुग्धभावितं दुग्धे सिक्तं कार्यम्। कीदृशम? आज्ययुतहरस्तयोजितम्, आज्ययुतेन घृतेनाभ्यक्तेन हस्तेन करेण योजितं क्षीरमध्ये क्षिप्तम्। पुनर्गृहीत्वा घृताभ्यक्तेन करेणैकीभूतं पृथक्कार्यम्। एवं प्रत्यहं कर्म कार्यम्। यावद्दश दिनानि। ततो गोमयेन गोशकृता बहुशो बहून वारान् विरूक्षितं मर्दितम्। क्रोडः सूकरः। मृगो हरिणः। क्रोडस्येदं क्रौडम्। मृगस्येदं मार्गम्। क्रौडमार्गपिशितैर्मासैर्धूपितम् भाण्डान्तरस्थं धूपयेत्।

ततो मांसेनामिषेण सूकरवसया वराहमज्जाय समन्वितं संयुतं परिकर्मितायामवतनो भूमौ रोपितम्। परिकर्मिता तिलपवनेन। ततः क्षीरसंयुतेन जलेनोदेकेनावसेचितं सुतृप्तं तद्बीजम्। एवंकृते कुसुमयुक्तं पुष्पसंयुतमेव जायत उत्पद्यते।।

अधुना तिन्तिडीविधानमाह-

**तिन्तिडीत्यपि करोति वल्लरी व्रीहिमाषतिलचूर्णसक्तुभिः।**

**पूतिमांससहितैश्च सेचिता धूपिता च सततं हरिद्रया।।२१।।**

अपिशब्दः सम्भावनायाम्। तिन्तिडीत्यपि वल्लरी करोतिः, अभिनवाङ्करा सम्पद्यतेः यतः सा अतिकठिना। कैः ? व्रीहिमाषतिलचूर्णसक्तुभिः, व्रीहिचूर्णैः शालिचूर्णैः माषचूर्णैः, तिलचुर्णैः, सक्तुभिश्च। कीदृशैः? पूतिमभांससहितैः क्लिन्नमांसयुतैः। एतैश्च सेचिता सिक्ता सततं सर्वकाल्

१. महा.भा. अनुशासनपर्व - ५८/२३

२. महा.भा.अनुशासनपर्व- ६३/४८

३. महा.भा.अनुशासनपर्व- ५८/२८

हरिद्रया च धूपिता। एतदुक्तं भवति – तिन्तिडीबीजं व्रीहिचूर्णमाषचूर्णतिलचूर्णसक्तुभिरेकीकृतैः पूतिमांससहितैः सिक्तं कृत्वा हरिद्रया धूपयेत्। वल्लरीं करोति। अपिशब्दादन्यबीजस्य वल्लरीकरणे कफ सन्देहः।।२१।।

अधुना कपित्थबीजरोपणमाह-

**क्षीरे शृते चाप्यनवा सुशीते ताला शतं स्थाप्य कपित्थबीजम्।**

**दिने दिने शोषितमर्कपादैर्मासं विधिसत्वेष ततोऽधिरोप्यम्।।२२, २३।।**

**चूर्णीकृतैर्माषतिलैर्यवैश्च प्रयूरयेद् मृत्तिकयान्तरस्थैः।**

**मत्स्यामिषाम्भस्सहितं च हन्याद्यावद् घनत्वं समुपागतं तत्।।२४, २५।।**

**उप्तं च बीजं चतुरङ्गुलाधो मत्स्याम्भसा मांसजलैश्च सिक्तम्।**

**वल्ली भवत्याशु शुभप्रवाला विस्मापनी मण्डपमावृणोति।।२६।।**

कपित्थवल्लीकरणायेति। कपित्थबीजस्य वल्लीकरणाय वल्लीजननाय मूलान्येतानि। केषाम् ? आस्फोतधात्रीधववासिकानाम्, आस्फोतः सारिवा, धात्री आमलकी, धवो वृक्षः, वासिका प्रसिद्धा। एषां चतुर्णा चत्वारि च मूलानि, तथा वेतसो वृक्षः। वेतसस्य वृक्षस्य वल्ली व्रततिः समूला पलाशिनी पर्णयुक्ता। एवमेव सूर्यवल्ली। श्यामा प्रसिद्धा। केचित् त्रिवृदितीच्छन्ति। अतिमुक्तः स्यन्दनकः। एषां मूलैः सहिता, अष्टमूली भवति, अष्टानां मूलानां समाहारः अष्टमूली।

क्षीरे शृते चेति। अनया अष्टमूल्या सह क्षीरे शृते क्वथिते ततः सुशीते कृते तन्मध्ये कपित्थबीजलं तालशतं संस्थाप्य। तालो हस्तशब्दः। एतावन्तं कालं संस्थाप्य ततो गृह्णीयात्। अनन्तरमर्कपादैः सूर्यरश्मिभिः शोषितं कार्यम्। एवं दिने दिने यावन्मासं त्रिंशद्दिनानि तावदेवं विधिः। ततोऽनन्तरमधिरोप्य रोपणीयम्।

हस्तायतमिति। अक्टं गर्तं हस्तायतं हस्तप्रमाणमायतम्। समन्ततः समं वृत्तम्। तद् द्विगुणं गभीरं हस्तद्वितयं गम्भीरं तथाभूतं खात्वा तच्च प्रोक्तजलावपूर्णम् , प्रोक्तेन कथितेन जलेन क्षीरोदकेनावपूरितं कृत्वा ततस्तं शोषयेत्। ततः शुष्कमग्निना प्रदहेत्। शुष्कं प्रदग्धं च मधुसर्पिषा मधुना माक्षिकेण सर्पिषा घृतेन च भस्मसमन्वितेन भस्मना युक्तेन प्रलेपयेद् लिम्पेत्।

चूर्णीकृतैरिति। ततो माषैस्तिलैर्यवैश्चूर्णीकृतैः सच्चूर्णितैः प्रपुरयेत् : तमवटं मृत्तिकया पूरयित्वा ततोऽन्तरस्थैः, अन्तरे मध्ये स्थिता ये तैर्मृत्तिकयान्तरस्थैः। अयमर्थः

मृदाङ्गुलचतुष्कमात्रं पूरयित्वा ततो माषादिभिः पूरयेत्। पूनरपि तावन्मात्रं मृत्तिकया पूरयित्वा पुनरपि माषादिभिः पूरयेत्। ततस्तं मत्स्यामिषाम्भः सहितं च हन्यात्, मत्स्यामिषेण मत्स्यमांसेन युक्तं यदम्भो जलं तेन सहितं तदवटं हन्यात् पुनः पुनः क्षोदयेत्। यावत् तदवटं घनत्वं काठिन्यं समुपागतं प्राप्तम्।

उप्तमिति। ततस्तत्र चतुरङ्गुलाधश्चतुर्णामङ्गुलानामधस्तद्वृक्षबीजमुप्तं वापितं मत्स्याम्भसा मत्स्ययुक्तेन जलेन मांसयुक्तैर्जलैश्चोदकैः सिक्तं सेचितमाशु क्षिप्रमेव शुभप्रवाला शोभनपल्लवा वल्ली भवति सम्पद्यते। कीदृशी? विस्मापनी विस्मयजननी। मण्डपमाधारमावृणोति आच्छादयति।।

अत्रत्याः विषयाः बृहत्संहिताः बहूनां विषयाणां च समानता अस्ति। वृक्षायुर्वेदः, कुसुमलता, दकार्गलम्, वास्तुविद्या, मृत्, वृक्षारोपणं, दोहदः, रोगाः चिकित्सा, उद्यानानि ,इत्येतेषां विषये आधिक्येन ग्रन्थेऽस्मिन् विवरणं दृश्यते। ए.डी. १६ शतके चक्रपाणिमिश्रेण विरचितः वृक्षायुर्वेदोऽपि बहुषु विषयेषु समानताम् एति [१]। उपवनक्रिया कूपार्थंभूमिपरीक्षा अपि ग्रन्थेऽस्मिन् विषयकृतो दृश्यते। वात-पित्त- कफ-दोषदिशा वृक्षाणां भेदाः, रोगाः तन्निवारणमार्गाश्च वर्तन्तेऽस्मिन् ग्रन्थे।

**जललवणादीनामगिरणादिविषयः -**

**तेन तज्वलमादतं जरयत्यग्निमारुतौ।**

**आहरणपरिणामाच्च स्नेहो वृद्धिश्च जायते।।**[२]

वृक्षायुर्वेदः १९९६ तमे वर्षे, विश्ववल्लभः चक्रपाणिमिश्रस्य २००४ तमे वर्षे च अनुवादसहितं नलिनी एग्री हिस्ट्री फौण्डेशन, हैद्राबाद् द्वारा प्रकाशितो वर्तते। कृषिरीतिः, दोहदानाम् उपयोगः निर्माणं च, वृक्षरोगाः तत्परिहारश्च अस्य ग्रन्थस्य मुख्याः विषयाः भवन्ति।

बृहत्संहितायाः वृक्षायुर्वेदस्य, शार्ङ्गधरपद्धतेश्च[३] बहवो विषयाः अस्मिन् ग्रन्थेऽपि चर्चिताः। १९३५ मजुमदारः ग्रन्थमिमं प्राकाशयत्। साम्प्रतमस्य विविधप्रकाशनानि उपलभ्यन्ते। २३७ श्लोकैः युक्तोऽयं ग्रन्थः खिस्ताब्दे १३०० तमे प्रणीतः।

**वाटिका ......................यदि निर्मितः।**

**गृहात्पूर्वे कुवेर्यो च वारुणे शम्भुकोणके।।**

---

१. भारत में वृक्षायुर्वेद परम्परा -पृ. ५

२. महा.भा. अनुशासनपर्व - १७९/१८

**सदा सवित्री भविता सदा दानं प्रयच्छति।**

**सदा यज्ञं स पूजयेद् यो रोपयति पादपम्।।[1]**

गृहात्पूर्वे, पश्चिमें, उत्तरे वा ईशानकोणे वाटिकानिर्माणं करोति सः सर्वदा गायत्री पुरश्चरण पुण्यफलं प्राप्नोति। सर्वदा दानं प्रयच्छति तथा नित्य यज्ञकर्मणः फलं प्राप्नोति। वृक्षारोपणेऽपि महत् पुण्यफलं प्राप्यते।

**क्षेत्रां सप्त विभागा भाजितमतो भद्रं च भागत्रयं**

**तन्मध्ये जलवापिका जिनपदैरेकांशतो वेदिका।[2]**

**स्तम्भैर्द्वादशभिश्च मध्यरचितः कोणेषु कूपान्वितः**

**कर्तव्यो जलयन्त्र एष विधिवत् भोगाय पृथ्वीभुजाम्।।[3]**

वाटिकायाः प्रमाणं शतं (१००) दण्डमानेन कनिष्ठ वाटिका भवेत्। द्विशतं (२००) मानेन मध्यमा तथा त्रिशतं (३००) मानेन वाटिका निर्मीयते तदा सा वाटिका उत्तमा वाटिका प्रख्याता। तन्मध्ये धारामण्डपं तोययन्त्रं च अपि स्थापनीयम्।

**वामे भागे दक्षिणे वा नृपाणां त्रेधा कार्या वाटिका क्रीडनार्थम्।**

**एक द्वित्रिर्दण्डसंख्या शतं स्यान्मध्ये धारामण्डपं तोययन्त्रैः।।[4]**

सारवृक्षस्य कोष्ठेन घटीयन्त्रं निर्मापयेत्। तत्र स्त्रीणां वसन्तोत्सवे अनुरञ्जनार्थ दोला अपि निर्मापनीया। ग्रीष्मे- शरदि शीतलजकक्रीडा हेतवे मण्डपे जलोद्यानस्य प्रबन्धनमपि प्रकल्पयेत्। वाटिकायां आस्थानमण्डपस्य वनस्पतीनां सेचनार्थं तत्र घटीयन्त्रस्य स्थापना करणीया।

**आस्थानं प्रतिसेचनाय च घटीयन्त्रः सुसारो भवेत्**

**दोलः स्त्रीजनखेलनाथ रुचिरेवर्षावसन्तोत्सवे।**

**बालाप्रौढवधूः सुमध्यवननितागानैर्मनोहरारिभिः**

**ग्रीष्मेशारदकेकथशीतलजलक्रीडाशुभेमण्डपे।।[5]**

---

१. सी.पी. मजुमदार -

२. बृहद्वास्तुमाला, चरणीविचारः, श्लो , १५-१६, पृ-११५

३. राजवल्लभवास्तुशास्त्रम् , (जुगनू), अ.९.१९

४. राजवल्लभवास्तुशास्त्रम् , (जुगनू), अ.९.१८

५. राजवल्लभः , (नारायणभारती), अ.९.२३

वर्जयेत् पूर्वतोऽश्वत्थं दक्षिणतस्तथा।
न्यग्रोधं पश्चिमे भागे उत्तरे चाप्युदुम्बरम्।।
अश्वत्थे तु भयं ब्रूयात् प्लक्षे ब्रूयात्पराभवम्।
न्यग्रोधे राजतः पीडा नेत्रामयमुदुम्बरे।।
वटः पुरस्ताद्वन्यः स्याद्दक्षिणे चाप्युदुम्बरम्।
अश्वत्थः पश्चिमे भागे प्लक्षस्तुत्तरतो भवेत्।।[1]
सौम्यादेः शुभदौ कपित्थक- वटावौदुम्बराश्वन्थकौ।।[2]

अथान्येषां रोपणमाह-

**शतशोङ्कोलसम्भूतफलकल्केन भावितम्।**
**एतत्तैलेन वा बीजं श्लैष्मातकफलेन वा।।२७।।**

**वापितं करकोन्मिश्रमृदि तत्क्षणजन्मकम्।**
**फलभारान्विता शाखा भवतीति किमद्भतुम्।।२८।।**

अङ्कोलो वृक्षस्तत्सम्भूतफलकल्केन, एतत्फलस्य यः कल्को द्रव्यभागो विज्जलारूपस्तेन यस्य कस्यचिदद्वृक्षस्य बीजं शतशः शतवारं भावितं सिक्तम्। एततैलेन वा अङ्कोलफलतैलेन वा शतशो भावितम्। तदेव बीजं श्लेष्मातकवृक्षफलने वा तस्य कल्केन तैलेन वा शतशो भावितम्।

तच्च वापितं करकोन्मिश्रमृदि, करका अशनिपातस्तेनोन्मिश्रा च या मृत् तस्यां वापितमुप्तं तद्बीजं तत्क्षणजन्मकं यस्मिन्नेव क्षत्रे मुहूर्ते उत्पम् तस्मिन्नेव जायते। शाखा लता फलभारान्विता फलान्येव भारस्तेनान्विता, आनता वा भवतीति किमद्भुतं किमाश्चर्यम्। अवश्यमेव तद्भवतीत्यर्थः।।

अथ श्लेष्मातकरोपणमाह-

**श्लेष्मातकस्य बीजानि निष्कुलीकृत्य भावयेत् प्राज्ञः।**
**अङ्कोलविज्जलाद्भिश्छायायां सप्तकृत्वैवम्।।२९।।**
**माहिषगोमयघृष्टान्यस्य करीषे च तानि निक्षिप्य।**
**करकाजलमृद्योगे न्युप्तान्यह्ना फलकराणि।।३०।।**

---

१. बृहद्वास्तुमाला, श्लो. २४-२८, पृ-११६-११७

२. बृहद्वास्तुमाला, (चरणीविचार), श्लो. ११, पृ-११३

प्राज्ञो मेवी श्लेष्मातकस्य वृक्षस्य बीजानि निष्कुलीकृत्य कृत्रिमतुषमपास्य ततोऽङ्कोलफलानां या विज्जलाः पिच्छिललला आपस्ताभिरङ्कोलविज्जलाद्भिशछयायां भावयेत्। एवमनेन प्रकारेण सप्तकृत्वः सप्तवारं भावयेत्। अङ्कोलविज्जताद्भिर्भावयित्वा छायायां शोषयेत् पुनर्भावयित्वा शोषयेत् सप्तवारं यावत्।

ततस्तानि बीजानि माहिषगोमयेन महिषशकृता घृष्टानि शक्तानि, कृत्वा ततोऽस्य महिषस्य करीषे गोमयराशौ तानि बीजानि निक्षिप्यं संस्थापयेत् , तत्र च तावत् स्थाप्यानि भाण्डान्तर्गतानि यावत् करकाजलेन युक्ता मृद्भवति करकाजलेनाशनिपातपानीयेन या युक्ता मृत् या युक्ते स्थाने न्युप्तानि वापितानि अह्ना दिवसेन फलकराणि भवन्ति। एकेनै वाह्ना फलन्तीत्यर्थः।।२९-३०।।

**'स तैरर्कपत्रैर्भक्षितैः क्षारतिक्तकटुरूक्षैस्तीक्ष्णविपाकैश्चक्षुष्युपहतोऽन्धोबभूव'।**[1]

अथ वृक्षाणां रोपणनक्षत्राण्याह-

**ध्रुवमृदुमूलविशाखा गुरुभं श्रवणस्तथाश्विनी हस्तः।**

**उक्तानि दिव्यदुग्भिः पादपसंरोपणे भानि।।३१।।**

त्र्युत्तरा रोहिणी चेति ध्रुवाणि, अनुराधाचित्रामृगशिरोरेवत्यश्चेति मृदूनि, मूलम् विशाखा, तिष्यः, श्रवणः, अश्विनी , हस्तः- एतानि नक्षत्राणि पादपानां वृक्षाणां सरोपणे वपनकर्मणि दिव्यदृग्भिर्दिव्या सूक्ष्मार्थदर्शिनी दृग् येषां ते दिव्यदृशो मुनयो गर्गादयस्तैरुक्तानि कथितानि। केचिच्छस्तानि प्रशंसितानीति पठन्तीति।।

**ग्रहणात् सुखदुःखस्य छिन्नस्य च विरोहणात्।**

**जीवं पश्यामि वृक्षाणामचैतन्यं न विद्यते।।**[2]

शान्तिपर्वणि सस्यानां स्पर्श-गन्धरुचिज्ञानशक्तिरस्ति, तानि द्रष्टुं शक्नुवन्ति तथा चेतनाबोधश्य तेषामस्तीति सूच्यते। घनानामपि वृक्षाणाम् आकाशोऽस्ति न संशयः।..................

'ओषधीः प्रंतिमोदध्वं पुष्पवतीः प्रसूवरीः अश्वा इव सजित्वरीर्वीरुधः पारयिष्ण्वः', [3] '

**यथा वृक्षो वनस्पतिस्तथैव पुरूषोमृषा।**

**तस्य लोमानि पर्णानि त्वगस्त्योत्पाटिका बहिः।।**

१. महा.भा. आदिपर्व - ३/५२

२. महा.भा.अनुशासनपर्व- १७९/१०.७

३. ऋ.वे.१०.१७.३

**त्वच एवास्य रूधिरं प्रस्यन्दि त्वच उत्पटः।**

**तस्मात्तदातुष्यत् प्रेति रसो वृक्षादिनाहतात्।।**[१]

इत्येवं प्रकारेण वनस्पतिविभागीकरणं (Classification) सस्यभागानां विवरणम् (Morphology) आन्तरिकविवरणमपि (Anatomy) तैत्तिरीय- वाजसनेयीसंहितास्वपि दृश्यते वनस्पतीनामङ्गविभागः यथा- मूल-मूल काण्ड- वत्स इत्येवम्। 'ओषधिभ्यः स्वाहा मूलेभ्यस्वाहा'[२] ....

वृक्षाः, ओषधयः, वीरूधश्चेति वनस्पतीनां विभागीकरणमपि ऋग्वेदे कृतं दृश्यते[३]

**त्वामिमा ओषधीः सोम विश्वास्त्वमपो अजनयस्त्वं गाः।**

**त्वमातनो सर्वा अन्तरिक्षं त्वं ज्यौतिष वि तमो ववर्थ।।**[४]

**वनस्पति वन आस्थापयध्वम्**[५]

**नमो वृक्षेभ्य हरिकेशेभ्यः वनानां पतये नमः**[६]

**मनै नु ब्रभ्रूणामह ओम् शतं धामानि स्पत च।।**[७]

**अमरत्वं सदा कल्पो हरेश्चायतनं वटः।**

**न्यग्रोध हर मे पापं कल्पवृक्ष! नमोस्तु ते।।**[८]

**तस्मान्न छेदयेत् वृक्षान् सुपुष्पफलितान् कदा।**

**यदीच्छेत् कुलवृद्धिं च धनवृद्धिं च शाश्वतीम्।।**[९]

मनुष्याणां मृगाणामपि रोगनिवारणार्थं वनस्पतीनामुपयोगोऽस्तीति प्रतिपाद्यते। गजाश्वायुर्वेदनि-रूपणाध्याये[१०]

**इन्धनार्थं यथानीतमग्निहोत्रं तदुच्यते।**

**छाया विश्रमपथिकै : पक्षिणां निलयेन च।।**

**पत्रमूलत्वगादीञ्च औषधार्थन्तु देहिनाम्।**

**उपकुर्वन्ति वृक्षस्य पञ्चयज्ञः स उच्यते।।**[११]

---

१. बृह. उप. ३.९-२८

२. तै. संहिता ७.३.१९-२०

३. ऋ.व.-१०.१७

४. सा.वे. (पूर्व)- ६०४

५. ऋ.वे.- १०/१०१-११

६. य.वे. -१२/१७-१८

७. य.वे. (-१२/७५-१०१

८. ब्रह्म.पु.५८/१४

९. अ.पु. २०२/६-८

१०.ग.पु. २०१/२२-२५ (गजाश्वायुर्वेदानिरूपणम्-)

११.व.रा.पु. गोकर्णमाहात्म्यम्

पलाशः, तुलसी, बिल्वः, धात्री इत्यादीनामपि प्रांधान्यं तद्रा तेषाम् औषधगुणश्च स्कन्दपुराणेऽपि अश्वत्थस्य महत्त्ववर्णनं दृश्यते।[1]

वृक्षाणामुपयोगविषये शिवपुराणे, [2] भागवतपुराणे, [3]

गजाश्वायुर्वेद-निरूपणम्, पुनर्नवामहत्त्वम् [4]

पद्मपुराणे सृष्टिखण्डे, [5] गरुडपुराणे[6]

दशकूपसमा वापी दशवापीसमो ह्रदः।

दशह्रदसमः पुत्रो दशपुत्रसमो द्रुमः।।[7]

**फलकुसुमसम्प्रवृद्धिं वनस्पतीनां विलोक्य विज्ञेयम्।**

**सुलभत्वं द्रव्याणां निष्पत्तिश्चापि सस्यानाम्।।**

वृक्षचिकित्सापि निर्दिश्यते। अग्निपुराणे वृक्षायुर्वेदनाम्ना वृक्षचिकित्सा तथा कृषिविषयेऽपि। पद्मपुराणे मानवधर्मः वृक्षपरिपालनमस्तीति वृक्षारोपणविधिना। पुराणेषु वनस्पतिसम्बद्धाः विविधाः विषयाः परामृष्टाः। वृक्षेषु विद्यमानानां फलकुसुमादीनां दर्शनेन अवलोकनेन विविधानां द्रव्याणां सुलभत्वं सस्यानां निष्पत्तिश्य ज्ञातुं शक्यते। एवमेव प्रत्येकं ग्रहस्य स्वाधीनतायां विद्यमानानि धान्यादीनि अपि सन्ति-

**सर्वपार्श्वेष्वयैतस्य गन्धान्धमधुपाङ्गनान्।**

**सुमनोविटपारामान् कुर्याद् वासान् समुत्सुकान्।।**[8]

समराङ्गणसूत्रधारग्रन्थे परिखायाः परितो सुगन्धित पुष्पलता गुल्म- वृक्षैःयुक्तैः उद्यानानं निर्माणानिर्देशो प्राप्यते। यन्नगरस्य शोभां वर्धयित्वा मधुकरादीन् आकृष्टान् करोति इति राजभोगः वर्णयति। यथा हि -

**उद्यानानि च रम्याणि नगरस्य समन्ततः।**

**आम्रैराम्रातकैर्नीपैरशोकैश्चम्पकैस्तथा।।**

---

१. स्क.पु. ६/२४८, २४९.१
२. शि.पु. (उ.सं.) ११/१७,
३. भा.पु. ६/४/८, १०/२२/२३
४. गु.रु.पु. २०/२२-२५
५. पद्म पु. सृष्टि. २४/२, २६
६. गरु.पु.२४/२०२/६-८
७. मत्स्य. पु.
८. समराङ्गसूत्रधार, अ.१०.२३ (पूष्पेन्द्र)

पुंनागैर्नागपुष्पैश्च लकुचैः पनसैस्तथा :।
शालतालकदम्बैश्च बकुलैश्च सकेतकैः।।
मनोहरैः पुष्पितैश्च फलभारावनामितै :।
प्राचीनमलकैर्लोध्रैरङ्कोलैश्च सुपुष्पितैः।।[1]

अश्वत्थमेकं पिचुमन्दमेकं न्यग्रोधमेकं दशचिञ्चिणीकम्।
कपित्थबिल्वामलकत्रयञ्च पञ्चाम्रवापी नरकं न पश्येत्।।[2]

लतागुल्मवृक्षरोपणे स्तपुष्याश्विनीध्रुवैः।
विशाखा- मृग मूलाह्न- वारुणैश्च प्रशस्यते।।
गुरौ केन्द्रे शुभे शुक्रे विधौ वारिणि वोदये।
शुभयुक्तेक्षिते बन्धो सद्वारे वा शुभोदये।।[3]

बृहस्पतिमतानुसारमपि सोमवारयुते मूलनक्षत्रे च धनलग्ने वृक्षारोपणं शुभं भवति। द्वितीय योगः- गुरुवारे, रेवती नक्षत्रे जीवलग्ने वृक्षारोपणं कार्यमिति।[4]

---

१. महाभारत, आदिपर्व, अ.१९९.३९-४१
२. बृहद्वास्तुमाला, श्लो. २३ , पृ-११६
३. बृहद्वास्तुमाला, श्लो. ४२-४३, पृ-११९
४. बृहद्वास्तुमाला, श्लो. ४४, पृ-१२०

## २. दकार्गलाध्यायः

तत्रादावेव प्रयोजनप्रदर्शनार्थमाह-

**धर्म्यं यशस्यं च वदाम्यतोऽहं दकार्गलं येन जलोपलब्धिः।**

**पुंसां यथाङ्गेषु शिरास्तथैव क्षितावपि प्रोन्नतनिम्नसंस्थाः।।१।।**

**एकेन वर्णेन रसेन चाम्भश्च्युतं नभस्तो वसुधाविशेषात्।**

**नानारसत्वं बहुवर्णता च गतं परीक्ष्यं क्षितितुल्यमेव।।२।।**

अतोऽस्माद्वास्तुविद्याप्रकरणादनन्तरमहं वराहमिहिरो दकार्गलं वदामि कथयामि। कीदृशम? धर्म्यं यशस्यं च, धर्मं चाऽऽवहति यशश्चाऽऽवहति ददातीत्यर्थः। दकार्गलं किमुच्यते? अत आह- येन जलोपलब्धिः जलस्योदकस्योपलब्धिरुपलम्भनं प्राप्तिः। यथा येन प्रकारेण पुंसां पुरुषाणामङ्गेष्व-वयवेषु शिरा नाडयः प्रोन्नतनिम्नसंस्था अधरोत्तरभावेन, तथा तेन प्रकारेण क्षितौ भूमावप्यधरोत्तरभोवन प्रोन्नतनिम्नसंस्थिताः, अन्याः प्रोन्नता उच्चा अन्याश्च निम्नाः स्थिताः।

एकेन वर्णेनेति। अम्भो जलं नभस्त आकाशाच्च्युतं पतितमेकेन वर्णेनैकेन च स्वादेन वसुधाविशेषाद्भुवो नानाप्रकारत्वाद् नानारसत्वं बहुस्वादवर्णतां च गतं विचित्रवर्णत्वं प्राप्तमेवानेन प्रकारेण क्षितितुल्यं भूमिवर्णतुल्यं परीक्ष्यं विचार्यम्, नानारसवर्णत्वेनेति। तथा च वक्ष्यति-

अथ शिरानामान्याह-

**पुरुहूतानलयमनिर्ऋतिवरुणपवनेन्दुशङ्करा देवाः।**

**विज्ञातव्याः क्रमशः प्राच्याद्यानं दिशां पतयः।।३।।**

**दिक्पतिसंज्ञा च शिरा नवमी मध्ये महाशिसनाम्नी।**

**एताभ्योऽन्याः शतशो विनिः सृता नामभिः प्रथिताः।।४।।**

**पातालदूर्ध्वशिरा शुभा चतुर्दिक्षु संस्थिता याश्च।**

**कोणदिगुत्था न शुभाः शिरानिमित्तान्यतो वक्ष्ये।।५।।**

पुरुहुतादय इन्द्राद्या देवाः क्रमशः क्रमेण प्राच्याद्यानां पूर्वाद्यानां दिशामाशानां पतयः स्वामिनः। तद्यथा- पुरुहूत इन्द्रः स पूर्वस्यां दिश्यधिपतिः, अनलोऽग्निराग्नेष्याम् यमः पितृपतिर्दक्षिणस्याम्, निर्ऋती राक्षसाधिपतिनैर्ऋत्याम्, वरुणोऽपाम्पतिः, पश्चिमायाम् पवनो

वायुर्वायव्याम् इन्दुश्चन्दश्चोत्तरस्याम्, शङ्करो रुद्र ऐशान्याम्। अफ्रीकादेशस्योदाहरणमपि द्रष्टुं शक्यते अस्य देशस्य ईशानकोणः सम्यक्नास्ति। पश्चिम तथा वायव्यभूभागः अन्य दिशायां अधिकमस्ति। पूर्वदिशायां हिन्दमहासागर : अस्ति। वास्तुशास्त्र दृष्ट्या अस्मिन् देशे महान् दोषः अस्ति। तस्मात् कारणात् एव अस्य देशस्य अपरं नाम डार्ककॉन्टीनेंट अस्ति। अत्र सदा प्राकृतिक कोपश्च अकालोऽपिजायते। अनेकवर्षपर्यन्त देशोऽयं परतन्त्रोऽभवत्।

दिक्पतिसंज्ञया तन्नाम्नेपलक्षिता शिरा भवति। यथा पूर्वस्यां दिशि या शिरा सैन्द्री, आग्नेप्यामाग्नेयी, दक्षिणस्यां याम्या। एवं शेषास्वपि विज्ञेयम्। एवमष्टासु दिक्ष्वष्टौ शिरा भवन्ति। नवमी मध्ये महाशिरानाम्नी। आसां सर्वासां दिग्विदिक्स्थानां मध्ये मध्यभागे नवमी महाशिरा भवति। एताभ्यो नवभ्योऽन्याः शिराः शतशः शतप्रकारा विनिः सृता विनिर्गता नामभिः संज्ञाभिश्च प्रथिताः प्रख्याताः। तथा च वक्ष्यति-

पातालदूर्ध्वशिरा योद्धच्छति सा शुभा, याश्च शिराश्चतुर्दिक्षु संस्थितास्ताश्च शुभाः। कोणदिगुत्था विदिगुत्पन्नाः शिरा न शुभाः, अतोऽस्मादनन्तरं शिरानिमित्तानि शिराचिह्नानि वक्ष्ये कथयिष्ये।।३-५।।

यदि वयं रूसदेशस्य भौगोलिकं वातावरणं चिन्तयामश्चेत् तस्य पश्चिमदिशायाः भूभागः पूर्वापेक्षया विशालोऽस्ति अस्य देशस्य आग्नेय दिशायां कास्पियन सागर तथा दक्षिण दिशायां कालासागरोऽस्ति। आग्नेय दिशायां यज्जलमस्ति सः आर्कटिकप्रशान्तसागरयोर्मध्ये तल्लीनं भवति। अनेन कारणतः एव अत्रत्या प्रजाः झारशासने समय पूर्वमे देशोऽयं विखण्डितोऽभवत् परन्तु इदानी ईशानभागे जलमस्ति अनेन कारणतः पुनः उन्नति मार्गे देशोऽयं गचछति।

तानि चाह-

**यदि वेतसोऽम्बुरहिते देशे हस्तैस्त्रिभिस्ततः पश्चात्।**
**सार्धे पुरुषे तोयं वहति शिरा पश्चिमा तत्र।।६।।**
**चिह्नमपि चार्धपुरुषे मण्डूकः पाण्डुरोऽथ मृत् पीता।**
**पुटभेदकश्च तस्मिन् पाषाणो भवति तोयमधः।।७।।**

अम्बुरहिते जलवर्जिते देशे यत्र स्वभावन एवजलं न विद्यते, तत्र देशे जङ्गले यदि वेतसो वेतसवृक्षो दृश्यते ततस्तस्माद्वेतसवृक्षात् त्रिभिर्हस्तैः करैः, पश्चाात् पश्चिमायां दिशि सार्धे

पुरुषे खाते अधस्तोयं वक्तव्यम्। पुरुषशब्देनोत्रोर्ध्वबाहुः पुरुषो ज्ञेयः। स च विंशत्यधिकमङ्गुलशतं भवतीति सर्वत्र परिभाषा। ततश्च तस्मिन् खाते पश्चिमा शिरा वहति।

अर्धपूरुषे खाते चिह्नम्। किं तत्? मण्डूको भेकः पाण्डुरः पाण्डुरवर्ण ईषच्छवेतः। तथानन्तरं पीता पीतवर्णा मृन्मृतिका। ततस्तस्मिन् खाते पुटभेदकः पाषाणो भवति। पुटैर्भिद्यत इति पुटभेदस्तदधस्तोयं जलं भवति। तथा च सारस्वतः- **बृ.सं., पृ-७४**

अन्यदप्याह-

**जम्ब्वाश्चोदग्धस्तैस्त्रिभिः शिराधो नरद्वये पूर्वा।**

**मृल्लोहगन्धिका पाण्डुरा च पुरुषेऽत्र मण्डूकः।।८।।**

अम्बुरहिते देशे यदि जम्बूवृक्षो दृश्यते, तदा तस्माज्जम्बूवृक्षादुदगुत्तरस्यां दिशि त्रिभिर्हस्तैः करैरनन्तरमधो नरद्वये खाते पूर्वा शिरा वहति। अत्रापि चिह्नानि भवन्ति। अत्र पुरुषे खाते मृन्मृतिका लोहगन्धिका लोहसदृशगन्धा भवति। ततः परं पाण्डुरा ईषच्छुक्ला, ततो मण्डूको भेक इति।।

अन्यदप्याह-

**जम्बूवृक्षस्य प्राग्वल्मीको यदि भवेत् समीपस्थः।**

**तस्माद्दक्षिणपार्श्वे सलिलं पुरुषद्वयं स्वादु।।९।।**

**अर्धपुरुषे च मत्स्यः पारावतसन्निभश्च पाषाणः।**

**मृद्भवति चात्र नीला दीर्धं कालं च बहु तोयम्।।१०।।**

जम्बूवृक्षस्य प्राक् पूर्वस्यां दिशि समीपस्थो निकटवर्ती वल्मीको वल्मीककृतो मृत्स्तूपो भवति, तदास्माज्जम्बूवृक्षाद् दक्षिणपार्श्वे दक्षिणस्यां दिशि त्रिभिरेव हस्तैः। यत्र हस्त ग्रहणमाचार्यो न करोति तत्र प्रागुक्तं प्रमाणं सर्वत्र योज्यमित्यागमः। एवं त्रिभिर्हस्तैरधः पुरुषद्वये खाते स्वादु मिष्टं जलं भवति।

तत्रापि चिह्नं भवति। अर्धपुरुषे च खाते मत्स्यो दृश्यते। ततः पारावतः पक्षी तत्सन्निभस्तद्वर्णः पाषणो भवति, तथा चात्र नीला नीलवर्णा मृद्भवति। दीर्धं चिरकालं बहु च तोयं प्रभूतं जलं भवति। तथा च सारस्वतः- **बृ.सं., पृ-७५**

अन्यदप्याह-

**पश्चादुदुम्बरस्य त्रिभिरेव करैर्नरद्वये सार्धे।**

**पुरुषे सितोऽहिरश्माञ्जनोपमोऽधः शिरा सुजला।।११।।**

यदि जलवर्जिते देशे उदुम्बरस्य वृक्षोऽत्र दृश्यते, वल्मीकयुतो वियुतो वा, तदा तत्रोदुम्बरस्य पश्चात् पश्चिमायां दिशि त्रिभिरेव हस्तैरनन्नतरामधः सार्धे नरद्वये सुजला शोभन सलिला शिरा भवति। अत्राऽपि चिह्नानि अर्धे पुरुषे खाते सितः श्वेतोऽहिः सर्पो दृश्यते। ततः पाषाणोऽञ्जनोपमोऽञ्जनस-दृशोऽतिकृष्ण इत्यर्थः। ततोऽधः शिरा सुजला शोभनतोया वहति।।

अन्यदप्याह-

**उदगर्जुनस्य दृश्यो वल्मीको यदि ततोऽर्जुनाद्धस्तैः।**

**त्रिभिरम्बु भवति पुरुषैस्त्रिभिरर्धसमन्वितैः पश्चात्।।१२।।**

**श्वेता गोधार्धनरे पुरुषे मृद्धूसरा ततः कृष्णा।**

**पीता सिता ससिकता ततो जलं निर्दिशेदमितम्।।१३।।**

अर्जुनवृक्षस्योदगुत्तरस्यां दिशि यदि वल्मीको दृश्यते, वल्मीककृतो मृत्स्तूपो यदि भवति, ततोऽस्मादर्जुनात् पश्चात् पश्चिमायां दिशि त्रिभिर्हस्तैरतोतैरधस्त्रिभिरर्धसमन्वितैः सार्धैस्त्रिभिः पुरुषैरम्बु जलं भवति।

श्वेतेति। अत्र चिह्नानि भवन्ति। अर्धनरे खाते श्वेता शुक्लवर्णा गोधा प्राणिविशेषो दृश्यते। पुरुषे खाते धूसरा कृष्णश्वेता मृन्मृतिका। ततोऽन्तरतं कृष्णा मृत्। ततः पीतवर्णाः। ततोऽपि सिता श्वेता ससिकता वालुकासहिता। ततोऽनन्तरममितं प्रभूतं जलमुदकं निर्दिशेद् वदेत्।।

अन्यदप्याह-

**वल्मीकोपचितायां निर्गुण्डयां दक्षिणेन कथितकरैः।**

**पुरुषद्वये सपादे स्वादु जलं भवति चाशोष्यम्।।१४।।**

**रोहितमत्स्योऽर्धनरे मृत् कपिला पाण्डुरा ततः परतः।**

**सिकता सशर्कराऽथ क्रमेण परतो भवत्यम्भः।।१५।।**

निर्गुण्डी द्रव्यविशेषः। वनमिति प्रसिद्धम्। वल्मीकोपचिता वल्मीककृता मृत्स्तूपसंयुक्ता तत्र निर्गुण्डयां दक्षिणस्यां दिशि कथितकरैरुक्तहस्तैस्त्रिभिरित्यर्थः। पुरुषद्वये सपादे पादाधिके खाते अधः स्वादु मृष्टं जलमुदकमशोष्यं भवति।

रोहितवर्णो मत्स्योऽर्धनरे अधूपुरुषे खाते। ततो मृत्तिका कपिला गौरवर्णा। ततः परतः पाण्डुरा शुक्लवर्णा किञ्चित्। ततः सिकता वालुका सशर्कराऽथ सकर्णिका। क्रमेण परिपाटया। ततः परतोऽभ्यो जलं भवति।।

अन्यदप्याह-

**पूर्वेण यदि बदर्या वल्मीको दृश्यते जलं पश्चात्।**

**पुरुषैस्त्रिभिरादेश्यं श्वेता गृहगोधिकार्द्धनरे।।१६।।**

यदि बदर्या बदरीवृक्षस्य पूर्वेण पूर्वभागे वल्मीको वल्मीककृतो मृत्स्तूपो दृश्यते, तदा बदर्याः पश्चात् पश्चियामां दिशि त्रिभिः करैः प्रागुक्तैः परतस्त्रिभिः पुरुषैरधो जलमुदकमादेश्यं वक्तव्यम्। अर्धनरे खाते श्वेता गृहगोधिका दृश्यते। गृहगोधिका कुडयमत्स्या। तथा च सारस्वतः- **बृ.सं., पृ-७७**

अन्यदप्याह-

**सपलाशा बदरी चेद् दिश्यपरस्यां ततो जलं भवति।**

**पुरुषत्रये सपादे पुरुषेऽत्र च दुण्डुभश्चिह्नम्।।१७।।**

चेच्छब्दो यद्यर्थे। यजिलरहिते देशे सपलाशा पलाशवृक्षसहिता बदरी दृश्यते सवल्मीका वल्मीकविमुखा वा, तदाऽपरस्यां पश्चिमायां दिशि ततस्तस्या बदर्यास्त्रिभिरेव करैः परतोऽधः सपादे पुरुषत्रये जलं तोयं भवति। अत्र च चिह्नम् -पुरुषे खाते दुण्डुभो निर्विषः सर्पो दृश्यते। तथा च सारस्वतः। **बृ.सं., पृ-७७**

अन्यदप्याह-

**बिल्वोदुम्बरयोगे विहाय हस्तत्रयं तु याम्येन।**

**पुरुषस्त्रिभिरम्बु भवेत् कृष्णोऽर्द्धनरे च मण्डूकः।। १८।।**

बिल्वोदुम्बरयोर्यत्र योगो विल्व उदुम्बरवृक्षश्च यत्र समेतौ भवतः। तस्मिन् याम्येन दक्षिणस्यां दिशि हस्तत्रयं विहाय त्यक्त्वा त्रिभिः सार्धैः पुरुषैरधोऽन्बुजलं भवेत् स्यात्। अर्धनरे खाते कृष्णो मण्डूको दृश्यते।।

अन्यदप्याह-

**काकोदुम्बरिकायां वल्मीको दृश्यते शिरा तस्मिन्।**

**पुरुषत्रये सपादे पश्चिमदिक्स्था वहति सा च।।१९।।**

**आपाण्डुपीतिका मृद्गोरसवर्णश्च भवति पाषाणः।**

**पुरुषार्थे कुमुदनिभो दृष्टिपथं मूषको याति।।२०।।**

काकोदुम्बरिका फल्गुवृक्षः, स यत्र दृश्यते तस्यां दिशि यदि समीपे वल्मीको वल्मीककृतो मृत्स्तूपो दृश्यते, तदा तस्मिन्नेव वल्मीके शिरा भवति। सपाादे पुरुषत्रये खाते अधः सा च शिरा पश्चिमदिक्स्था वहति।

अथ चिह्नानि आपाण्डुपीतिका मृत्, पाण्डुरा पीतवर्णा च मुत्तिका प्रथमं भवति, ततो गोरसवर्णः शुक्लवर्णः पाषणोऽश्मा भवति। पुरुषार्थे खाते कुमुदनिभः श्वेतवर्णो मुषक आखुर्दृष्टिपथं दर्शनं याति दृश्यत इत्यर्थः।।

अन्यदप्याह-

**जलपरिहीने देशे वृक्षः कम्पिल्लको यदा दृश्यः।**

**प्राच्यां हस्तत्रितये वहति शिरा दक्षिणा प्रथमम्।।२१।।**

**मृन्नीलोत्पलवर्णा कापोता दृश्यते ततस्तमिन्।**

**हस्तेऽजगन्धको मत्स्यकः पयोऽल्पं च सक्षारम्।।२२।।**

जलपरिहीने निर्जले देशे यदा कम्पिल्लको वृक्षो दृश्यो भवति, तदा तस्य वृक्षस्य प्राच्यां पूर्वस्यां दिशि हस्तत्रितये करत्रयाण् परतोऽधः सपादैस्त्रिभिर्नरैः शिरा वहति।

प्रथममादौ मृन्नीलोत्पलवर्णा भवति, ततोऽन्तरं तस्मिन् खाते कापोता कपोतवर्णा मृत्तिका दृश्यते। हस्तेन खातेनाजगन्धश्छागलसदृशगन्धो मत्स्यो मीनो दृश्यते। तदनन्तरं मल्पं पयः पानीयम् तच्च सक्षारं भवति। सवलमित्यर्थः। तथा च सारस्वतः- **बृ.सं., पृ-७९**

अन्यदप्याह-

**शोणाकतरोरपरोत्तरे शिरा द्वौ करावतिक्रम्य।**

**कुमुदा नाम शिरा सा पुरुषत्रयवाहिनी भवति।।२३।।**

जलपरिहीने देशे यत्र शोणाकवृक्षो दृश्यते, तस्माच्छोणाकतरोरपरोत्तरे वायव्यां दिशि द्वौ करौ हस्तद्वयमतिक्रस्य परित्यज्य कुमुदा नाम शिरा भवति, सा च पुरुषत्रयवाहनी नरत्रयेऽम्भो भवति।।२३।।

अन्यदप्याह-

**आसन्नो वल्मीको दक्षिणपार्श्वे विभीतकस्य यदि।**

**अध्यर्धे भवति शिरा पुरुषे ज्ञेया दिशि प्राच्याम्।।२४।।**

यद्यि विभीतकवृक्षस्य दक्षिणापार्श्वे दक्षिणस्यां दिशि आसन्नो निकटवर्ती वल्मीको भवति, तदा तस्य विभीतकस्य प्राच्यां पूर्वस्यां हस्तद्वयाम् परतः सार्धे पुरुषे अधः शिरा ज्ञेया ज्ञातव्या। तथा च सारस्वतः – **बृ.सं., पृ-७९**

अथान्यदप्याह-

**तस्यैव पश्चिमायां दिशि वल्मीको यदा भवेद्धस्ते।**

**तत्रोदग् भवति शिरा चतुर्भिरर्धाधिकैः पुरुषैः।।२५।।**

**श्वेतो विश्वभरकः प्रथमे पुरुषे तु कुङ्कमाभोऽश्मा।**

**अपरस्यां दिशि च शिरा नश्यति वर्षत्रयेऽतीते।।२६।।**

तस्यैव विभीतकस्य पश्चिमायां दिशि वल्मीको यदा भवेत् स्यात्, तदा तस्य विभीतकस्य उदगुत्तरस्या दिशि हस्ते त्यक्ते अधश्चतुर्भिरर्धाधिकैः सार्धैश्चतुर्भिः पुरुषैः शिरा भवति।

अत्रापि चिह्नानि- प्रथमे पुरुषे खाते श्वेतः श्वेतवर्णो विश्वम्भरकः प्राणिविशेषो दृश्यते, तदनन्तरं कुङ्कुमाभः कुङ्कुमकान्तिरश्मा पाषाणो दृश्यते। ततोऽनन्तरमपरस्यां पश्चिमायां दिशि शिरा वहति। सा च शिरा वर्षत्रयेऽतीतेऽतिक्रान्ते नश्यति क्षयं याति।

अन्यदप्याह-

**सकुशः सित ऐशान्यां वल्मीको यत्र कोविदारस्य।**

**मध्ये तयोर्नरैरर्धमपञ्चमैस्तोयमक्षोभ्यम्।।२७।।**

**प्रथमे पुरुषे भुजगः कमलोदरसन्निभो मही रक्ता।**

**कुरुविन्दः पाषाणश्चिह्नान्येतानि वाच्यानि।।२८।।**

यत्र यस्मिन् स्थाने कोविदारस्य कोविदारवृक्षस्य ऐशान्यां पूर्वोत्तरस्यां दिशि सकुशः दर्भयुक्तो वल्मीको भवति। स च सितः श्वेतस्तत्र तयोः कोविदारवल्मीकयोर्मध्येऽन्तरे नरैः पुरुषैरर्धपञ्चमैः सार्धैश्चतुर्भिरधस्तोयं जलमक्षोभ्यं यत् क्षोभयितुं न शक्यते तद्वद् भवति।

अत्र चिह्नानि भवन्ति - प्रथमे पुरुषे खातेऽधो भुजगः सर्पः कमलोदरसन्नियः पद्मगर्भाभो दृश्यते। ततोऽनन्तरं मही भू रक्ता लोहितवर्णा। तदनन्तरं कुरुविन्दः पाषाणः। एतानि चिह्नानि लक्षणानि अत्र वाच्यानि वक्तव्यानि।।

अन्यदप्याह-

**यदि भवति सप्तपर्णो वल्मीकवृतस्तदुत्तरे तोयम्।**

**वाच्यं पुरुषैः पञ्चभिरत्रापि भवन्ति चिह्नानि।।२९।।**

**पुरुषार्थे मण्डूको हरितो हरितालसन्निभा भूश्च।**

**पाषाणोऽभ्रनिकाशः सौम्या च शिरा शुभाम्बुवहा।।३०।।**

सप्तपर्णो वृक्षविशेषः। सच यदि वल्मीकसंयुतो भवति तदुत्तरे तस्मात् सप्तपार्णादुत्तरे उत्तरस्यां दिशि हस्तात् परतः पञ्चभिः पुरुषैरधस्तोयं वाच्यम्। चिह्नानि वक्ष्यमाणानि भवन्ति।

पुरुषेऽर्धे हरितः शुकवर्णो मण्डूको दर्दुरः। तथाऽत्र हरितालसन्निभा हरितालवर्णा भूरवनिर्भवति। अभ्रनिकाशोऽभ्रसदृशो मेधाभः कृष्णः पाषणोऽश्मा। ततः सौम्योत्तरा च शिरा शुभाम्बुवहा मृष्टजलवाहिनी भवति। तथा च सारस्वतः- **बृ.सं., पृ-८१**

अन्यदप्याह-

**सर्वेषां वृक्षाणामधः स्थितो दर्दुरो यदा दृश्यः।**

**तस्माद्धस्ते तोयं चतुर्भिरर्धाधिकैः पुरुषैः।।३१।।**

**पुरुषे तु भवति नकुलो नीला मृत्पीतिका सततः श्वेता।**

**दर्दुरसमानरूपः पाषाणो दृश्यते चात्र।।३२।।**

सर्वेषां वृक्षाणामशेषाणां तरूणां येषां केषाञ्चिद्यदाऽधः स्थितो मूले समवस्थितो दर्दुरो मण्डूको दृश्यते, ततस्तमाद्वृथादुत्तरस्यां दिशि हस्ते तोयमधश्चतुभिरर्धाधिकैः पुरुषैः सार्धैश्चतुर्भिर्नरैर्भवति।

अत्र चिह्नानि- पुरुषे खाते नकुलो भवति, ततो नीला मृत्, ततः पीता। ततः श्वेता मृत, ततो दर्दुरसमानरूपो मण्डूकसदृशः पाषाणोऽत्र दृश्यते तदधस्तोयम्। तथा च सारस्वतः- **बृ.सं., पृ-८१**

अन्यदप्याह-

**यद्यहिनिलयो दृश्यो दक्षिणतः संस्थितः करञ्जस्य।**

**हस्तद्वये तु याम्ये पुरुषत्रितये शिरा सार्धे।।३३।।**

**कच्छपकः पुरुषार्थे प्रथमं चोद्भिद्यते शिरा पूर्वो।**

**उदगन्या स्वादुजला हरितोऽश्माधस्ततस्तोयम्।। ३४।।**

यदि करञ्जवृक्षस्य दक्षिणतो दक्षिणस्यां दिशि संस्थितोऽहिनिलयः सर्पगृहं वल्मीको दृश्यते, तदा याम्ये दक्षिणे करञ्जाद्धस्तद्वये हस्तद्वयं त्यक्त्वा अधः सार्धे पुरुषत्रितये शिरा भवति।

अत्र चिह्नानि- पुरुषार्थे खाते कच्छपकः कूर्मो दृश्यते। तत्र प्रथममादौ पूर्वा शिरा उद्भिद्यते दृश्यते। ततोऽन्या द्वितीया उदगृत्तरस्यां दिशि शिरा स्वादुजला मृष्टोदका उद्भिद्यते। अधो हरितः शुक्रवर्णोऽश्मा भवति। ततः परं तोयं जलं भवति।।

अन्यदप्याह-

**उत्तरतश्च मधूकादहिनिलयः पश्चिमे तरोस्तोयम्।**

**परिहृत्य पञ्च हस्तानर्धाष्टमपौरुषान् प्रथमम्।।३५।।**

**अहिराजः पुरुषेऽस्मिन् धूम्रा धात्री कुलुत्थवर्णोऽश्मा।**

**माहेन्द्री भवति शिरा वहित सफेनं सदा तोयम्।।३६।।**

मधूकाद् मधूकवृक्षादुत्तरत उत्तरस्यां दिशि यद्यहिनिलयो वल्मीको दृश्यते , तदा तरोर्मधूकात् पश्चिमे पश्चिमायां दिशि पञ्च हस्तानं परिहृत्य त्यक्त्वा ततोऽधोऽर्धाष्टमपौरुषान् खात्वा सार्धैः सप्तभिर्नरैरधस्तोयं जलं भवति।

प्रथममादावेकस्मिन् पुरुषे खाते अहिराजः सर्पराड् दृश्यते। ततो धूम्रा रक्तश्यामा धात्री भूः। ततः कुलुत्थवर्णोऽश्मा पाषाणः। तत्र च माहेन्द्री पूर्वा शिरा भवति। सा च सदा सर्वकालं सफेनं फेनसयुंक्तं तोयं जलं वहति।।

अन्यदप्याह-

**वल्मीकः स्निग्धो दक्षिणेन तिलकस्य सकुशदूर्वश्वेत।**

**पुरुषैः पञ्चभिरम्भो दिशि वारुण्यां शिरा पूर्वा।।३७।।**

तिलकवृक्ष्स्य दक्षिणे वल्मीकः स्निग्धः सकुशदूर्वः कुशैर्दर्भैर्दूर्वाभिः शाद्वलैश्च युक्तो यदि भवति, तदा तिलकवृक्षस्य वारुण्यां पश्चिमायां दिशि पञ्चभिर्हस्तैः परतोऽधः पञ्चभिः पुरुषैरम्भो जलं भवति, तत्र पूर्वा शिरा। तथा च सारस्वतः। **बृ.सं., पृ-८३**

अन्यदप्याह-

**सर्पावासः पश्चाद्यदा कदम्बस्य दक्षिणेन जलम्।**

**परतो हस्तत्रितयात् षड्भिः पुरुषैस्तुरीयोनैः।।३८।।**

**कौबेरी चात्र शिरा वहति जलं लोहगन्धि चाक्षोभ्यम्।**

**कनकनिभो मण्डूको नरमात्रे मृत्तिका पीता।।३९।।**

यदि कदम्बस्य वृक्षस्य पश्चात् पश्चिमायां दिशि सर्पावासो वल्मीको दृश्यते, दक्षिणस्यां दिशि हस्तत्रियात् परतोऽनन्तरमधः षड्भिः पुरुषैस्तुरीयोनैश्चतुर्भागरहितैरित्यर्थः।

तत्र जलं वहति। तत्र च कौबेरी उत्तरा शिरा भवति, तस्यां च लोहगन्धि जलं लोहगन्ध-सदृशमुदकमक्षोभ्यं च वहति। अतिप्रभूतमित्यर्थः। नरमात्रे पुरुषमात्रे खाते कनकनिभः सुवर्णसदृशो मण्डूको भवति। पीता पीतवर्णा मृत्तिका।।

अन्यदप्याह-

**वल्मीकसंवृतो यदि तालो वा भवति नालिकेरो वा।**

**पश्चात् षड्भिर्हस्तैर्नरैश्चतुर्भिः शिरा याम्या।।४०।।**

यदि वल्मीकसंवृतो वल्मीकयुक्तस्यालवृक्षो भवति, नालिकेरो वा वल्मीकसंवृतो भवति, तदा यस्य तालस्य नालिकेरस्य वा पश्चात्, पश्चिमायां दिशि षड्भिर्हस्तैः परतश्चतुर्भिर्नरैरधः शिरा याम्या दक्षिणा वहति।।

अन्यदप्याह-

**याम्येन कपित्थस्याहिसंश्रयश्चेदुदग्जलं वाच्यम्।**

**सप्त परित्यज्य करान् खात्वा पुरुषान् जलं पञ्च।।४१।।**

**कर्बुरकोऽहिः पुरुषे कृष्णा मृत् पुटभिदपि च पाषाणः।**

**श्वेता मृत् पश्चिमतः शिरा ततश्चोत्तरा भवति।।४२।।**

याम्येनेति। कपित्थवृक्षस्य याम्येन दक्षिणस्यां दिशि यद्यहिसंश्रयो वल्मीको भवेत् तत उदगुत्तरस्यां दिशि कपित्थस्य सप्त करान् हस्तान् परित्यज्य पञ्च पुरुषान् खात्वाऽधो जलं वाच्यम्।

कर्बुरकोऽहिरिति। पुरुषे खाते कर्बुरकः कृष्णशुक्लः कपिलवर्णोऽहिः सर्पो भवति। तथा कृष्णा कृष्णवर्णा मृत्। ततः पुटभितः पुटभेदकः पाषाणोऽश्मा। पुटैर्दलैर्भिद्यत इति पुटभित्। ततः श्वेता मृत्। तत्र च पश्चिमायां दिशि शिरा एका भवति। ततोऽनन्तरमुत्तरा शिरा च भवति।।

अन्यदप्याह-

**अश्मन्तकस्य वामे बदरी वा दृश्यतेऽहिनिलयो वा।**

**षड्भिरुदक् तस्य करैः सार्धे पुरुषत्रये तोयम्।।४३।।**

**कूर्मः प्रथमे पुरुषे पाषाणो धूसरः ससिकता मृत्।**

**आदौ च शिरा याम्या पूर्वोत्तरतो द्वितीया च।।४४।।**

अश्मन्तकस्य वृक्षस्य वामे उत्तरस्यां दिशि बदरीवृक्षो दृश्यते, अहिनिलयो वल्मीको वा दृश्यते, तदा तस्याश्मन्तकस्योदगुत्तरस्यां दिशि षड्भिः, करैर्हस्तैः परतः सार्धे पुरुषत्रये अधस्तोयं जलं भवति।

तत्र चिह्नानि- पुरुषे खाते कूर्मो दृश्यते। ततः पाषाणो धूसरः कृष्णश्वेतः। ततः ससिकता मृत्। आदौ प्रथमं याम्या दक्षिणा शिरा भवति। द्वितीयां पूर्वोत्तरा ऐशानी शिरा भवति।।

अन्यदप्याह-

**वामेन हरिद्रतरोर्वल्मीकश्चेज्जलं भवति पूर्वे।**

**हस्तत्रितये सत्र्यंशैः पुम्भिः पञ्चभिर्भवति।।४५।।**

**नीलो भुजगः पुरुषे मृत् पीता मरकतोपमश्चाश्मा।**

**कृष्णा भूः प्रथमं वारुणी शिरा दक्षिणेनान्या।।४६।।**

हरिद्रतरोर्वामेनोत्तरेण यदि वल्मीको दृश्यते, तदा हरिद्रतरोः पूर्वे पूर्वस्यां दिशि हस्तत्रितये परतः पुम्भिः पुरुषैफ पञ्चभिः सत्र्यंशैस्त्रिभागाधिकैरधो जलं भवति।

अथ प्रथमे पुरुषे खाते नीलो भुजगः सर्पो दृश्यते, ततो मृत् पीता। अश्मा पाषाणो मरकतोपमो मरकतसदृशः। ततः कृष्णा भूः। प्रथममादौ वारुणी शिरा, अन्या द्वितीया दक्षिणेन भवति।

अन्यदप्याह-

**जलपरिहीने देशे दृश्यन्तेऽनूपजानि चेन्निमित्तानि।**

**वीरणदूर्वा मृदवश्च यत्र तस्मिन् जलं पुरुषे।।४७।।**

**भार्ङ्गी त्रिवृता दन्ती सूकरपादी च लक्ष्मणा चैव।**

**नवमालिका च हस्तद्वयेऽम्बु याम्ये त्रिभिः पुरुषैः।।४८।।**

यत्र जलरहिते देशे अनूपजानि अनूपसम्भवानि निमित्तानि चिह्नानि दृश्यन्तेऽवलोक्यन्ते, अनूपे बहूदके स्थाने यानि लक्षणानि भवन्ति तानि च तत्र दृश्यन्ते इत्यर्थः। तथा वीरणस्तृणविशेषः, दूर्वा शाद्वलम्, एते यत्र मृदवोऽत्तिकोमलास्तत्राद्यपुरुषे जलं भवति।

भार्ङ्गी प्रसिद्धा, त्रिवृता त्रिवृत, दन्ती, सूकरपादी, लक्ष्मणा, नवमालिका, एताः सर्वा एव स्वनामभिः, सुप्रसिद्धाः। एता ओषधयो यत्र सन्ति तत्र याम्ये दक्षिणे हस्तद्वये त्यक्ते अधिस्त्रिभिः पुरुषैरम्बु भवति।।

अन्यदप्याह-

**स्निग्धाः प्रलम्बशाखा वामनविकटद्रुमाः समीपजलाः।**

**सुषिरा जर्जरपत्रा रूक्षाश्च जलेन सन्त्यक्ताः॥४९॥**

स्निग्धाः प्रजलम्बशाखा वामनविकटद्रुमाः। ये द्रुमा वृक्षाः स्निग्धाः सस्नेहाः, प्रलम्बशाखा दीर्घलताः, वामना अतिह्रस्वाः, विकटा विस्तीर्णाः एते सर्व एव समीपजलाः सन्निकृष्टोदकाः। तथा ये द्रूमाः सुषिरा अन्तरसाराः, जर्जरपत्रा विवर्णपत्राः, ये च रूक्षा निःस्नेहास्ते सर्वे जलेन उदकेन सन्त्यक्ता वर्जिताः। तत्र जलं न भवतीत्यर्थः॥

अन्यदप्याह-

**तिलकाम्रातकवरुणकभल्लातकविल्वतिन्दुकाङ्कोलाः।**

**पिण्डारशिरीषाञ्जनरुषका वञ्जुलोऽतिबला॥५०॥**

**एते यदि सुस्निग्धा वल्मीकैः परिवृतास्ततस्तोयम्।**

**हस्तैस्त्रिभिरुत्तरतश्चतुर्भिरर्धेन च नरेण॥५१॥**

तिलकेति। तिलको वृक्षविशेषः, आम्रातकः, वरुणकः, भल्लातकः , विल्वः, तिन्दुकः, अङ्कोल, पिण्डार, शिरीषः, अञ्जनम्, परूषकः, वञ्जुकः, अतिबला- एते सर्व एव वृक्षविशेषाः, केचिद्विटपप्रायाः, यदि च सुस्निग्धैर्वल्मीकैः, परिवृता भवन्ति, तदा तेषामेव तिलकादीनामुत्तरस्यां त्रिभिर्हस्तैः, परतोऽघश्चतुर्भिर्नरैरर्धेन च नरेण सार्धैश्चतुभिः, पुरुषैस्तोयं जलं भवति।

अन्यदप्याह-

**अतृणे सतृणा यस्मिन् सतृणे तुणवर्जिता मही यत्र।**

**तस्मिन् शिरा प्रदिष्टा वक्तव्यं वा धनं चास्मिन्॥५२॥**

अतृण इति। यस्मिन् स्थाने अतृणे तृणवर्जिते सतृणा तृणसंयुता मही भूर्दृश्यते, तथा यस्मिन् देशे सतृणे मही तुणवर्जिता भवति, तस्मिन स्थने अधः शिरा प्रदिष्टा। अतो जलं भवतीत्यर्थः। धनं वित्तं वा वक्तव्यम्। तस्मिन् स्थाने सार्धैश्चतुर्भिर्नरैरिति केचिदनुवृत्तिमिच्छन्ति॥

अन्यदप्याह-

**कण्टक्यकण्टकानां व्यत्सासेऽम्भस्त्रिभिः करैः पश्चात्।**

**खात्वा पुरुषत्रितयं त्रिभागयुक्तं धनं वा स्यात्॥५३॥**

यत्र कण्टकिवृक्षः, खदिरादिकः, अकण्टकानां पलासादीनां मध्ये भवति, व्यत्यासे वा सकणटकानां मध्ये अकण्टको भवति, तदा तस्माद्वृक्षात् पश्चात् पश्चिमायां दिशि त्रिभिः, करैस्त्रिभिर्हस्तैः परतः त्रिभागयुक्तं खात्वा ततोऽधोऽम्भो जलं भवति, धनं वित्तं वा स्याद् भवेत्।।

अन्यदप्याह-

**नदति मही गम्भीरं यस्मिंश्चरणाहता जलं तस्मिन्।**

**सार्धैस्त्रिभिर्मनुष्यैः कौबेरी तत्र च शिरा स्यात्।।५४।।**

यस्मिन् स्थाने मही भूश्चरणाहता पादताडिता गम्भीरं मधुरं नदति शब्दं करोति, तस्मिन्नेव स्थाने सार्धैस्त्रिभिर्मनुष्यैः कौबेरी उत्तरा च शिरा तत्र स्याद् भवेत्। जलं तत्र भविष्यतीत्यर्थः।।

अन्यदप्याह-

**वृक्षस्यैका शाखा यदि विनता भवति पाण्डुरा वा स्यात्।**

**विज्ञातव्यं शाखातले जलं त्रिपुरुषं खात्वा।।५५।।**

यदि वृक्षस्य तरोरेका शाखा विनता नम्रा भवति, पाण्डुरा विवर्णा स्याद् भवेत् तत्र च तस्यां शाखायामेव तले अधस्त्रिपुरुां पुरुषत्रयं खात्वा अधो जलमुदकं विज्ञातव्यं ज्ञेयमिति।।

अन्यदप्याह-

**फलकुसुमविकारो यस्य तस्य पूर्वे शिरा त्रिभिर्हस्तैः।**

**भवति पुरुषैश्चतुर्भिः पाषाणोऽधः क्षितिः पीता।।५६।।**

यस्य वृक्षस्य फलानां कुसुमानां पुष्पाणां च विकारो विकृतिरन्यसदृशत्वं तस्य वृक्षस्य पूर्वे पूर्वस्यां दिशि त्रिभिर्हस्तैः परतश्चतुर्भिः, पुरुषैरधः शिरा भवति, तथा चाधः पाषणोऽश्मा क्षितिर्भूः पीता भवति।।

अन्यदप्याह-

**यदि कण्टकारिका कण्टकैर्विना दृश्यते सितैः कुसुमैः।**

**तस्यास्तलेऽम्बु वाच्यं त्रिभिर्नरैरर्धपुरुषे च।।५७।।**

यदि कण्टकारिका निदिग्धा कण्टकैर्विना कण्टकवर्जिता भवति सा च सितैः श्वेतैः कुसुमैः पुष्पैस्तदा तस्याः, कण्टकारिकायास्तले अधिस्त्रिभिर्नरैरर्धपुरुषे च सार्धैस्त्रिभिर्नरेरम्बु जलं वाच्यं वक्तव्यमिति।।

अन्यदप्याह-

**खर्जूरी द्विशिरस्का यत्र भवेज्जलविवर्जिते देशे।**

**तस्याः पश्चिमभागे निर्देश्यं त्रिपुरुषैर्वारि।।५८।।**

यत्र यस्मिन् देशे जलविवर्जिते द्विशिरस्का द्विशीर्षा खर्जूरी भवेत् स्यात्। तस्याः खर्जुर्याः पश्चिमभागे पश्चिमायां दिशि हस्तद्वयात् परतस्त्रिपुरुषैस्त्रिभिर्नरैः खातैरधोवारि जलं वक्तव्यम्। तथा च सारस्वतः- **बृ.सं., पृ-८८**

अन्यदप्याह-

**यदि भवति कर्णिकारः सितकुसुमः स्यात्पलाशवृक्षो वा।**

**सव्येन तत्र हस्तेद्वयेऽम्बु पुरुषद्वये भवति।।५९।।**

कर्णिकारः कर्णिकारवृक्षो यदि सितकुसुमः स्यात् श्वेतपुरुषो भवेत्, अथवा पलाशवृक्षः सितकुसुमः स्यात्, तत्र तस्मिन् स्थाने सव्येन दक्षिणेन कर्णिकारपलाशयोर्हस्तद्वये परतोऽधः पुरुषद्वये नरयुगले अम्बु जलं भवति।।

अन्यदप्याह-

**यस्यामूष्मा धात्र्यां धूमो वा तत्र वारि नरयुगले।**

**निर्देष्टव्या च शिरा महता तोयप्रवाहेण।।६०।।**

यस्यां धात्र्यां यत्र भूमौ ऊष्मा दृश्यते, धूमो वा यत्र दृश्यते, तत्र तस्यां नरयुगले पुरुषद्वये, अधो महता तोयप्रवाहेण बहूदकयुक्ता शिरा निर्देष्टव्या वक्तव्य।।

अन्यदप्याह-

**यस्मिन् क्षेत्रोद्देशे जातं सस्यं विनाशमुपयाति।**

**स्निग्धमतिपाण्डुरं वा महाशिरा नरयुगे तत्र।।६१।।**

यस्मिन् यत्र क्षेत्रोद्देशे जातमुत्पन्नं सस्यं विनाशमुपयाति गच्छति। अथवा तत्रैव क्षेत्राद्देशे स्निग्धं सस्यमतीव भवति। अतिपाण्डुरं वाऽतिपीतवर्णं वा भवति। तत्र तस्मिन् क्षेत्रे तस्मिन्नेव स्थाने नरयुगे पुरुषद्वये अधो महाशिरा भवति, महाजलं तत्र वहती त्यर्थः।।

एवं जाङ्गलानूपभूम्योर्जलपरिज्ञानमभिधाय अधुना मरुभूमौ शिराविज्ञानं कथयामीत्याह-

**मरुदेशे भवति शिरा यथा तथातः परं प्रवक्ष्यामि।**

**ग्रीवा करभाणामिव भूतलसंस्थाः शिरा यान्ति।।६२।।**

जलवर्जिता भूभागो मरुप्रदेशः। मरुदेशे मरुभूमौ यथा येन प्रकारेण शिरा भवति, तथा तेन प्रकारेण अतोऽस्मात्परं प्रवक्ष्यामि कथयामि। करणाभामुष्ट्राणामिव यथा ग्रीवा येन प्रकारेण कन्धरा कुटिला, तथा तेनैव प्रकारेण शिरा भूतलसंस्था यान्ति गच्छन्ति, अतिनिम्ना भवन्तीत्यर्थः।।

तत्राहः

**पूर्वोत्तरेण पीलोर्यदि वल्मीको जलं भवति पश्चात्।**

**उत्तरगमना च शिरा विज्ञेया पञ्चभिः पुरुषैः।।६३।।**

**चिह्नं दर्दुर आदौ मृत् कपिला तत्परं भवेद्धरिता।**

**भवति च पुरुषेऽधोऽश्मा तस्य तलेऽम्भो विनिर्देश्यम्।।६४।।**

पूवोत्तरेणेति। यदि पीलोः पीलुवृक्षस्य पूर्वोत्तरेणैशान्यां दिशि वल्मीको वल्मीकिकृतो मृत्स्तूपो भवति, तदा पीलोरेव वृक्षात् पश्चिमायां दिशि सार्धैश्चतुर्भिर्हस्तैः परतः पञ्चभिः पुरुषैरधो जलं भवति। तत्र चोतरगमना, उत्तरस्यां दिशि या गच्छति, सोत्तरगमना। शिरा विज्ञेया ज्ञातव्या।

चिह्नमिति। आदौ प्रथमे पुरुषे खाते दुर्दूरो मण्डूकश्चिह्नम, ततो मृत् कपिला, तत्परं तदनन्तरं हरिता शुक्ला भवति। अधः सर्वचिह्नानां तले अश्मा पाषाणो भवति। तस्याश्मनस्तले अधोऽम्भो जलं विनिर्देश्यं वक्तव्यम्। तथा च सारस्वतः- **बृ.सं., पृ-९०**

अन्यदप्याह-

**प्रथमे पुरुषे भुजगः सितासितो हस्तमात्रमूर्तिश्च।**

**दक्षिणतो वहति शिरा सक्षारं भूरि पानीयम्।।६५, ६६।।**

पीलोरेव पीलुवृक्षस्य प्राच्यां पूर्वस्यां दिशि यदि वल्मीको दृश्यते, ततस्तस्मादेव पीलुवृक्षाद् याम्यायां दिशि अर्धपञ्चमैः सार्धचतुर्भिहस्तैः परतोऽधः सप्तभिः पुरुषैस्तोयं जलं वाच्यम्।

प्रथम इति। अत्र चिह्नानि – प्रथमे पुरुषे खाते सितासितः श्वेकृष्णवर्णो हस्तमात्रमूर्तिर्ह-स्तप्रमाणो भुजगः सर्पो दृश्यते। मूर्तिशब्दोनाकार उच्यते। दक्षिणतो दक्षिणस्यां दिशि शिरा भूरि बहु सक्षारं पानीयं जलं वहति।।

अन्यदप्याह-

**उत्तरतश्च करीरस्याहिगृहं दक्षिणे जलं स्वादु।**

**दशभिः पुरुषैर्ज्ञेयं पुरुषे पीतोऽत्र मण्डूकः।।६७।।**

करीरस्य करीरवृक्षस्य उत्तरत उत्तरस्यां दिशि यद्यहिगृहं वल्मीको दृश्यते, तदा करीरस्य दक्षिणे दक्षिणस्यां दिशि सार्धैश्चतुर्भिर्हस्तैः , परतोऽधो दशभिः, पुरुषैरधः स्वादु मृष्टं जलं ज्ञेयम्। अत्र प्रथमे पुरुषे खाते पीतः मण्डूको दृश्यते। तथा च सारस्वतः– **बृ.सं., पृ-९१**

अन्यदप्याह-

**रोहीतकस्य पश्चादहिसावश्चेत्त्रिभिः करैर्याम्ये।**
**द्वादश पुरुषान् खात्वा सक्षारा पश्चिमेन शिरा।।६८।।**

रोहीतस्य वृक्षस्य पश्चात् पश्चिमायां दिशि यद्यहिवासो वल्मीको दृश्यते तदा रोहीतकस्य याम्ये दक्षिणस्यां दिशि त्रिभिः करैस्त्रिर्भिर्हस्तैः परतो द्वादश पुरुषान् खात्व अधस्तले शिरा सक्षारा पश्चिमेन वहति।।

अन्यदप्याह-

**इन्द्रतरोर्वल्मीकः प्राग्दृश्यः पश्चिमे शिरा हस्ते।**
**खात्वा चतुर्दश नरान् कपिला गोधा नरे प्रथमे।।६९।।**

इन्द्रतरोरिन्द्रवृक्षस्य प्राक् पूर्वस्यां दिशि यदि वल्मीको दृश्यते, तदा तस्येन्द्रत पश्चिमे पश्चिमायां दिशि हस्ते त्यक्ते चतुर्दश नरान् पुरुषान् खात्वा शिरा अधस्तले वहति। प्रथमे नरे कपिला कपिलवर्णा गोधा प्राणिविशेषो दृश्यते।।

अन्यदप्याह-

**यदि वा सुवर्णनाम्नस्तरोर्भवेद्वामतो भुजङ्गगृहम्।**
**हस्तद्वये तु याम्ये पञ्चदशनरावसानेऽम्बु।।७०।।**
**क्षारं पयोऽत्रं नकुलोऽर्धमानवे ताम्रसन्निभश्चाश्मा।**
**रक्ता च भवति वसुधा वहति शिरा दक्षिणा तत्र।।७१।।**

यदि वा सुवर्णनाम्न इति। यदि वाऽयं निपातश्चार्थे। यदि च सुवर्णनाम्नस्तरोः सुवर्णवृक्षस्य वामतः उत्तरतस्यां द्यिशि भुजङ्गगृहं वल्मीको दृश्यते, तदा याम्ये दक्षिणस्यां दिशि हस्तद्वये परतः पञ्चदशनरावसाने पञ्चदशभिः पुरुषैः खातैरधोऽम्बु जलं भवति।

अत्रास्मिन् क्षारं पयो जलम्। अर्धमानवे अर्धपुरुषे खाते नकुलस्ताम्रसन्नि-भस्ताम्रवर्णोऽश्मा पाषाणो भवति, रक्ता च रक्तवर्णा वसुधा भूमिः। तत्र दक्षिणा शिरा वहति।

अन्यदप्याह-

**बदरीरोहितवृक्षौ सम्पृक्तौ चेद्विनापि वल्मीकम्।**
**हस्तत्रयेऽम्बु पञ्चात् षोऽशभिर्मानवैर्भवति।।७२।।**

**सुरसं जलमादौ दक्षिणा शिरा वहति चोत्तरेणान्या।**

**पिष्टनिभः पाषाणो मृत् श्वेता वृश्चिकोऽर्धनरे।।७३।।**

बदरीति। बदरीरोहितवृक्षौ सम्पृक्तौ शिलष्टौ भवतः। विनापि वल्मीकम्। वल्मीकस्तत्र भवतु वा न, तदा पश्चात् पश्चिमायां दिशि ताभ्यामेव वृक्षाभ्या् वल्मीकस्तत्र भवतु वा न। तदा पश्चात् पश्चिमायां दिशि ताभ्यामेव वृक्षाभ्यां हस्तत्रयपरतः षोऽशभिर्मानवैः पुरुषैरम्बु जलमधो भवति।

अत्र सुरसं शोभनरसं मुष्टं जलमादौ प्रथमं दक्षिणा शिरा वहति, अन्या द्वितीया चोतरेण। अत्र पिष्टनिभः शालिचूर्णप्रख्यः पाषाणोऽश्मा भवति। मृतश्वेता शुक्लमृत्तिका। अर्धनरे चार्धपुरुषे खाते वृश्चिको दृश्यत इति।।

अन्यदप्याह-

**सकरीरा चेद्वदरी त्रिभिः करैः पश्चिमेन तत्राम्भः।**

**अष्टादशभिः पुरुषैरैशानि बहुजला च शिरा।।७४।।**

चेच्छब्दो यद्यर्थे। यदि बदरी सकरीरा करीरवृक्षसहिता दृश्यते , तदा तत्र पश्चिमेन पश्चिमायां दिशि त्रिभिः करैस्त्रिभिर्हस्तैः परतोऽष्टादशभिः पुरुषैः खातैरधोऽम्भः पानीयं भवति। तत्र चैशानी शिरा बहुजला प्रभूततोया च वहति।।

अन्यदप्याह-

**पीलुसुमेता बदरी हस्तत्रयसम्मिते दिशि प्राच्याम्।**

**विंशत्या पुरुषाणामशोध्यमम्भोऽत्र सक्षारम्।।७५।।**

यदि पीलुसमेता पीलुवृक्षसहिता बवरी दृश्यते, तदा प्राच्यां पूर्वस्यां दिशि हस्तत्रयसम्मिते करत्रयपरिच्छिन्ने देशे विंशत्या पुरुषाणामधोऽम्भो जलं भवति, तच्चाशोष्यं प्रभूतम्। सक्षारं लवणसहितमित्यर्थः।।

अन्यदप्याह-

**ककुभकरीरावेकत्र संयुतौ यत्र ककुभविल्वौ वा।**

**हस्तद्वयेऽम्बु पश्चान्नरैर्भवेत् पञ्चविंशत्या।।७६।।**

यत्र यस्मिन् प्रदेशे कुकभकरीरौ वृक्षो एकत्र एकस्मिन् स्थाने संयुतौ समेतौ दृश्येते, अथवा तत्र ककुभविल्वावेकत्र संयुतौ, तत्र पश्चात्पश्चिमायां दिशि हस्तद्वये परतः पञ्चविंशत्या नरैरम्बु जलं भवति।।

अन्यदप्याह-

**वल्मीकमूर्धनि यदा दूर्वा च कुशाश्च पाण्डुराः सन्ति।**

**कूपो मध्ये देयो, जलमत्र नरैकविंशत्या।।७७।।**

यदा वल्मीकमूर्धनि वल्मीकोपरि दूर्वा शाद्वलं कुशा वा दर्भाश्च पाण्डुराः सन्ति भवन्ति, तदा वल्मीकमूर्धनि मध्ये कूपो देयः। अत्रास्मिन् स्थाने नरैकविंशत्या एकविंशत्या पुरुषैर्जलमुदकं भवति।।७७।।

अन्यदप्याह-

**भूमिः कदम्बकयुता वल्मीके यत्र दृश्यते दूर्वा।**

**हस्तद्वयेन याम्ये नरैर्जलं पञ्चविंशत्या।।७८।।**

यत्र यस्मिन् स्थाने भूमिः कदम्बकयुता कदम्बवृक्षसंयुक्ता भवति, तदा वल्मीके वल्मीकवृते मृत्स्तूपे दूर्वा शाद्वलं दृश्यते, तत्र कदम्बाद्याम्ये दक्षिणस्यां दिशि हस्तद्वयेन परतः पञ्चविंशत्या पुरुषैर्जजलमूदकं भवति।।

अन्यदप्याह-

**वल्मीकत्रयमध्ये रोहीतकपादयो यदा भवति।**

**नानावृक्षैः सहितस्त्रिभिर्जलं तत्र वक्तव्यम्।।७९।।**

**हस्तचतुष्के मध्यात् षोडशभिश्चाङ्गुलैररुदग्वारि।**

**चत्वारिंशत् पुरुषान् खात्वाऽश्माऽधः शिरा भवति।।८०।।**

वल्मीकत्रयस्य शृङ्गाटकवत् स्थितस्य मध्ये अन्तर्यदा रोहीतकपादपो रोहीतकवृक्षो भवति, स च त्रिभिवृक्षैर्नानाप्रकारैर्विजातीयैः सहितः, तत्र तस्मिन् स्थाने जलमुदकं वक्तव्यम्।

हस्तचतुष्के मध्यादिति। तत्र वल्मीकत्रितये मध्याद्रोहीतकपादुदगुत्तरस्यां दिशि हस्तचतुष्के करचतुष्टये षोऽशभिश्चाङ्गुलैः परतश्चत्वारिशत् पुरुषान् खात्वा अश्मा पाषाणो दृश्यते। तदधस्तस्य तले शिरा भवति।।

अन्यदप्याह-

**ग्रन्थिप्रचुरा यस्मिन् शमी भवेदुत्तरेण वल्मीकः।**

**पश्चात् पञ्चकरान्ते शतार्धसंख्यैर्नरैः सलिलम्।।८१।।**

यस्मिन् प्रदेशे ग्रन्थिप्रचुरा ग्रन्थिबहुला शमी स्याद् भवेत्। उत्तरेण च वल्मीकस्तत्र शमीवृक्षस्य पश्चात् पश्चिमायां दिशि पञ्चकरान्ते पञ्चभिर्हस्तैः परतः शतार्धसंख्यैर्नरैः पुरुषाणां पञ्चाशतोऽधः सलिलं जलं भवति।।

अन्यदप्याह-

**एकस्थाः पञ्च यदा वल्मीका मध्यमो भवेच्छ्वेतः।**

**तस्मिन् शिरा प्रदिष्टा नरषष्ट्या पञ्चवर्जितया।।८२।।**

यदा पञ्च वल्मीका एकस्था भवन्ति, तदा तेषां पञ्चमो मध्यमः। पञ्चसु मध्ये स्थितः। स च यदि श्वेतः शुक्लो भवति, तदा तस्मिन्नेव मध्यवल्मीके शिरा प्रदिष्टोक्तो। पञ्च वर्जितया नरषष्ट्या पञ्चपञ्चाशता नरैरित्यर्थः।।

अन्यदप्याह-

**सपलाशा यत्र शमी पश्चिमभागेऽम्बु मानवैः षष्टया।**

**अर्धनरेऽहिः प्रथमं सवालुका पीतमृत् परतः।।८३।।**

यत्र यस्मिन् प्रदेशे सपलाशा पलाशसहिता शमी भवति, तत्र तस्याः शम्याः पश्चिमभागे हस्तपञ्चकात् परतः षष्टया मानवैः पुरुषैर्नरषष्टयाऽधोऽम्बु जलं भवति। प्रथममादावर्धनरे अधूपुरुषे खाते अहिः सर्पो भवति, ततः सवालुका वालुकासहिता पीता पीतवर्णा मृद् भवति। तथा च सारस्वतः- **बृ.सं., पृ-९५**

अन्यदप्याह-

**वल्मीकेन परिवृतः श्वेतो रोहीतको भवेद्यस्मिन्।**

**पूर्वेण हस्तमात्रे सप्तत्या मानवैरम्बु।।८४।।**

यस्मिन् प्रदेशे श्वेतः शुक्लवर्णो रोहीतको वृक्षो वल्मीकेन परिवृतो भवति, तत्र रोहीतकात् पूर्वेण पूर्वस्यां दिशि हस्तमात्रादनन्तरं सप्तत्यां मानवैरधोऽम्बु जलं भवति।।

अन्यदप्याह-

**श्वेता कण्टकबहुला यत्र शमी दक्षिणेन तत्र पयः।**

**नरपञ्चकसंयुतया सप्तत्याहिर्नरार्धे च।।८५।।**

यत्र यस्मिन् प्रदेशे श्वेता शुक्लवर्णा कण्टकबहुला प्रभूतकण्टका शमी भवति, तत्र शम्या दक्षिणेन हस्तमात्रात् परमो नरपञ्चकसंयुतया सप्तत्या पञ्चसप्तत्या पुरुषैरधो जलं पयो भवति। नरार्धे पुरुषार्थे च खाते अहिः सर्पो भवति। तथा च सारस्वतः- **बृ.सं., पृ-९६**

अत्रैव विशेषान्तरमाह-

**मरुदेशे यच्चिह्नं न जाङ्गले तैर्जलं विनिर्देश्यम्।**

**जम्बूवेतसपूर्वैर्ये पुरुषास्ते मरौ द्विगुणाः।।८६।।**

यच्चिह्नं यल्लक्षणं मरुदेशे कथितं तैश्चिह्नैर्जाङ्गले स्वल्पोदके, देशे जलमुदकं न विनिर्देश्यं न वक्तव्यम्।जम्बूवेतसपूर्वैरिति। यदि "वेतसोऽम्बुरहिते देशे" तथा " जम्ब्वाश्चो-दग्धस्तैः"। इत्यादिकै-र्जम्बूवेतसपूर्वैर्लक्षणैर्ये पुरुषाः कथितास्तैरेव चिह्नैर्मरौ मरुभूमौ दृष्टैर्द्विगुणास्त एव पुरुषा वाच्या इति।।

अन्यदप्याह-

**जम्बूस्त्रिवृता मौर्वी शिशुमारी सारिवा शिवा श्यामा।**

**वीरुधयो वाराही ज्योतिष्मती गरुडवेगा च।।८७।।**

**सूकारिकमाषपर्णीव्याध्रपदाश्चेति यद्यहेर्निलये।**

**वल्मीकाद्वत्तरतस्त्रिभिः करैस्त्रिपुरुषे तोयम्।।८८।।**

जम्बूर्वृक्षविशेषः त्रिवृता, मौर्वी, शिशुमारी, सारिवा, शिवा, श्यामा- एता वीरुधय ओषधयः, तथा वक्ष्यमाणाश्च वीरुधम एव। कास्ताः ? वाराही ज्योतिष्मती गरुडवेगा च। सूकरिकमाषपर्णीव्याघ्रे-पदाश्चैता ओषधयो यद्यहेर्निलये सर्पगृहे वल्मीके भवन्ति, तदा वल्मीकादुत्तरत उत्तरस्यां दिशि त्रिभिः, करैस्त्रिभिर्हस्तैः परतः पुरुषत्रये खाते अधस्तोयं वक्तव्यम्।

किं सर्वत्र ? नेत्याह-

**एतदनूपे वाच्यं जाङ्गलभूमौ तु पञ्चभिः पुरुषैः।**

**एतैरेव निमित्तैर्मरुदेशे सप्तभिः कथयेत्।।८९।।**

एतद्यदुक्तं तदनूपे बहूदके वाच्यं वक्तव्यमढ। बहूदको देशोऽनूपः। जाङ्गलभूमौ तु स्वल्पोदके एभिरेव लक्षणैः पञ्चभिः पुरुषैर्वाच्यम्। एतैरेव प्रागुक्तौर्निमित्तैश्चिह्नैर्मरुभूमौ सप्तभिः पुरुषैः कथयेद् वदेत्।

अन्यदप्याह-

**एकनिभा यत्र मही तृणतरुवल्मीकगुल्मपरिहीना।**

**तस्यां यत्र विकारो भवति धरित्र्यां जलं तत्र।।९०।।**

यत्र यस्मिन् स्थाने मही भूरेकनिभा एकवर्णा सा च तृणतरुवल्मीकगुल्मपरिहीना, तृणैः, तरुभिः वल्मीकैः, गुल्मैरेकमूलैः, शाखासमूहो गुल्म। एतैः परिहीना वर्जिता। तस्यां मह्यां यत्र यस्मिन् स्थाने विकारोऽन्यसदृशत्वम् , तत्र तस्मिन् धरित्र्यां भूमौ पञ्चभिः पुरुषैर्जलं भवति। तथा च सारस्वतः- **बृ.सं., पृ-९७**

अन्यदप्याह-

**यत्र स्निग्धा निम्ना सवालुका सानुनादिनी वा स्यात्।**

**तत्रार्धपञ्चकैर्वारि मानवैः पञ्चभिर्यदि वा।।९१।।**

यत्र यस्मिन् देशे स्निग्धा सस्नेहा मही निम्नाऽनुच्चा सवालुका वालुकासहिता सानुनादिनी सशब्दा वा भूः स्याद् भवेत् तत्र तस्मिन् स्थाने अर्धपऽञ्चकैः सार्धैश्चतुर्भिः पुरुषैः पञ्चभिर्वा पुरुषैरधो जलं भवति।।

अन्यदप्याह-

**स्निग्धतरूणां याम्ये नरैश्चतुर्भिर्जलं प्रभूतं च।**

**तरुगहनेऽपि हि विकृतो यस्तस्मात् तद्वदेव वदेत्।।९२।।**

यत्र स्निग्धाः सस्नेहास्तरवो वृक्षा भवन्ति तत्र तेषां स्निग्धतरूणां याम्ये दक्षिणे चतुर्भिर्नरैः पुरुषैरधः प्रभूतं बहु जलं भवति। तरुगहने वृक्षगहनेऽपि यो वृक्षो बहूना मध्ये विकृतः सविकारो दृश्यते पुष्पफलानां स्वरूपान्यत्वं दृश्यते, तस्माद्वृक्षादुदकं तद्वत् तेनैव प्रकारेण वदेत्। याम्ये नरैश्चतुर्भिरित्यर्थः।।

अन्यदप्याह-

**नमते यत्र धरित्री सार्धे पुरुषेऽम्बु जाङ्गलानूपे।**

**कीटा वा यत्र विनालयेन बहवोऽम्बु तत्रापि।।९३।।**

यत्र यस्मिन् प्रदेशे धरित्री भूः। नमते पादपीडिता सत्यधो याति, जाङ्गलानूपे जाङ्गले अनूपे वा, तत्र सार्धे पुरुषे अम्बु जलं भवति। कीटा वा कृमयो यत्र यस्मिन् प्रदेशे आलयेन विना दृश्यन्ते बहवः प्रभूताः, तत्राम्बू जलं भवति। अपिशब्दात् सार्धे पुरुषे।।९३।।

**उष्णा शीता च मही शीतोष्णाम्भस्त्रिभिर्नरैः सार्धैः।**

**इन्द्रधनुर्मत्स्यो वा वल्मीको वा चतुर्हस्तात्।।९४।।**

यत्र सर्वत्रोष्णा मही भूः। एकस्मिन् देशे शीता भवति, अथवा सर्वत्र शीता एकस्मिन् देशे उष्णा भवति। तत्र त्रिभिर्नरैः सार्धैरम्भो जलं भवति। इन्द्रधनुस्त्रिदशचापं तच्च सूर्यरश्मिसम्ब-न्धाद्यत्रोत्पद्यते मत्स्यो वा मत्स्यो दारकत्वाद्भवाो वल्मीको वा ऱ्यस्यां भूमौ जाङ्गलानूपयोर्दृश्यते, तत्र चतुर्हस्तात् परतोऽधोऽम्भो जलं भवति।।

अन्यदप्याह-

**वल्मीकानां पङ्क्त्यां यद्येकोऽभ्युच्छ्रितः शिरा तदधः।**
**शुष्यति न रोहते वा सस्यं ऱ्यस्यां च तत्राम्भः।।९५।।**

वल्मीकानां पंक्त्यां स्थितानां मध्याद् यद्येको वल्मीकोऽभ्युच्छ्रित उच्चतरो भवति, तदा तदधस्तयोच्छ्रितस्य वल्मीकस्याधस्तले चतुर्भिर्हस्तैः शिरा जलं भवति। यस्यां भूमौ जातं सस्यं शुष्यति शोषं प्राप्नोति , उप्तं वा न रोहते न जायते, तस्यां भूमौ चतुर्भिर्हस्तैरधो जलं भवति। एतज्जाङ्गलानूपयोः। तथा च सारस्वतः- **बृ.सं., पृ-९९**

अन्यदप्याह-

**न्यग्रोधपलाशोदुम्बरैः समेतैस्त्रिभिर्जलं तदधः।**
**वटपिप्पलसमवाये तद्वद्वाच्यं शिरा चोदक्।।९६।।**

न्यग्रोधपलाशोदुम्बरैः समेतैस्त्रिभिर्जलं तदधः। वटपलाशोदुम्बरैस्त्रिभिर्वृक्षैः समेतैरेकत्र संयुक्तै स्तदधस्तेषामेवाधस्त्रिभिर्हस्तैर्जलं भवति, शिरा च तत्रोदगुत्तरा भवति। तथा वटपिप्पलसमवाये वटपिप्पलयोगे तद्वत् तेनैव प्रकारेणाधो जलं वाच्यम् त्रिभिः ,करैः शिरा चोदगिति। तथा च सारस्वतः- **बृ.सं., पृ-९९**

अथ कूपलक्षणमाह-

**आग्नेये यदि कोणे ग्रामस्य पुरस्य वा भवेत् कूपः।**
**नित्यं स करोति भयं दाहं च समानुषं प्रायः।।९७।।**
**नैर्ऋतकोणे बालक्षयं च वनिताभयं च वायव्ये।**
**दिक्त्रयमेतत्त्यक्त्वा शेषासु शुभावहाः कूपाः।।९८।।**

ग्रामस्य पुरस्य वा यद्याग्नेयकोणे पूर्वदक्षिणस्यां दिशि कूपो भवेत् स्यात्, तदा च कूपः तस्मिन् ग्रामे पुरे वा नित्यं सर्वकाले भयं करोतीत्यर्थः। प्रायो बाहुल्येन समानुषं दाहं च करोति। मनुष्यादि दहति अग्निभयं करोतीत्यर्थः।

ग्रामस्य पुरस्य वा नैर्ऋतकोणे दक्षिणापश्चिमायां दिशि कूपो भवति तदा बालानां शिशूनां क्षयं करोति। वायव्यकोणे पश्चिमोत्तरस्यां दिशि च वनितानां स्त्रीणां भयं करोति। एतद्यथोक्तं दिक्त्रयं त्यत्त्वा यथान्यासु पञ्चसु पूर्वदक्षिणपश्चिमोत्तरैशानीषु शुभावहाः शुभप्रदाः कूपा इति।।

एतद्यदुक्तं दकार्गलं तत्सारस्वतं दृष्टैदानी मानवं वक्ष्यामीत्याह-

**सारस्वतेन मुनिना दकार्गलं यत्कृतं तदवलोक्य।**

**आर्याभिः कृतमेतद् वृत्तैरपि मानवं वक्ष्ये।।९९।।**

सारस्वतेन मुनिना कृतं रचितं तदवलोक्य दृष्टा एतदार्याभिः कृतम्, मानवं मनुना विरचितं दकार्गलमिदानी वृत्तैर्वक्ष्ये कथयिष्ये।।

तच्चाह-

**स्निग्धाः यतः पादपगुल्मवल्ल्यो निश्छिद्रपत्राश्च ततः शिरास्ति।**

**पद्मक्षुरोशीरकुलाः सगुण्ड्राः काशाः कुशा वा नलिका नलो वा।।१००।।**

**खर्जूरजम्ब्वर्जुनवेतसाः स्युः क्षीरान्विता वा द्रुमगुल्मवल्ल्यः।**

**छत्रेभनागाः शतपत्रनीपाः स्युर्नक्तमालाश्च ससिन्दुवाराः।।१०१।।**

**विभीतको वा मदयन्तिका वा यत्रास्ति तस्मिन् पुरुषत्रयेऽम्भः।**

**स्यात् पर्वतस्योपरि पर्वतोऽन्यस्तत्रापि मूले पुरुषत्रयेसम्भः।।१०२।।**

स्निग्धा यत इति। यत इति निपातः सप्तम्यन्ते। यतो यस्यां भूमौ पादपा वृक्षाः, गुल्मा एकमूलाः शाखासमूहाः, वल्ली व्रततिः, एताः सर्वा यत्र स्निग्धः सस्नेहाः तथा निश्छिद्रपत्राश्च निश्छिद्राणि पत्राणि च यासाम्। ततस्तस्मिन्नेव स्थाने अधः पुरुषयत्रे शिरा अस्ति विद्यते। अथवा पद्म स्थलपद्मम्, क्षुरो गोक्षुरः , उशीरः, कुलः एते द्रव्यविशेषाः। सगुण्ड्रा गुण्ड्रसहिताः, गुण्ड्रस्तृणविशेषः, काशाः कुशा नलिका नलो वा एते सर्व एव तृणविशेषाः।

खर्जुरः, जम्बूः, अर्जुनः, वेतस- एते सर्वे वृक्षविशेषा यत्र स्युर्भवेयुः। अथवा क्षीरान्विताः सक्षीरा द्रुमा वृक्षाः। गुल्म एकमूलः शाखासमूहः, वल्ल्यो व्रतत्य -एते यत्र सक्षीराः। छत्रः प्रसिद्धः , इभो हस्तिकर्णः, नागो नागकेसरं यस्मादुत्पद्यते, शतत्रपं पद्मम्, नीपो वृक्षविशेषः, नक्तमालाः करजाः- एते पूर्वोक्ताः ससिन्दुवाराः सिन्दुवारैर्वृक्षविशेषैः सहिता यत्र स्युः।

विभीतको वृक्षविशेषः , मदयन्तिका द्रव्यविशेषः- एते यत्र यस्मिन् प्रदेशे भवन्ति, तत्र अधस्तले पुरुषत्रये अम्भो जलं स्यात्। पर्वतस्योपरि पर्वतोऽन्यस्तत्रापि मूले पुरुषत्रये वेति।

अथवा पर्वतस्योपर्यन्यो द्वितीयः पर्वतो यत्र स्याद् भवेत् तत्रोपरिष्ठस्य मूले पुरुषत्रये वा अम्भो जलमस्ति विद्यते। तथा च मनुः- **बृ.सं., पृ-१०१**

अन्यदप्याह-

**या मौञ्जिकैः काशकुशैश्च युक्ता नीला च मृद्यत्र सशर्करा च।**

**तस्यां प्रभूतं सुरसं च तोयं कृष्णाथवा यत्र च रक्तमृद्वा।।१०३।।**

या भूमौञ्जिकैः काशैः कुशैश्च तृणविशेषैर्युक्ता, यत्र यस्यां भूमौ नीला नीलवर्णा मृत् सशर्करा सकणिका, त भवति, तस्यां भूमौ प्रभूतं बहु सुरसं मृष्टं च तोयं जलं भवति। यत्र कृष्णा कृष्णवर्णा रक्ता रक्तवर्णा वा मृत् मत्र च प्रभूतं बहु सुरसं तोयं भवेदिति।।

अत्रे भृगुणानाह-

**सशर्करा ताम्रमही कषायं क्षारं धरित्री कपिला करोति।**

**आपाण्डुराया लवणं प्रदिष्टं मृष्टं पयो नीलवसुन्धरायाम्।।१०४।।**

या मही भूः सशर्करा सकणिका ताम्रवर्णा च सा कषायं पयः पानीयं करोति। कपिला कपिलवर्णा च धरित्रीः भूः क्षारं पयः करोति। आपाण्डुरायां धरित्र्यां लवणं पयः प्रदिष्टमुक्तम्। नीलवसुन्धरायां नीलायां भूमौ मृष्टं पयो भवति।।

अन्यदप्याह-

**शाकाश्वकर्णार्जुनविल्वसर्जाः श्रीपर्ण्यरिष्टाधवशिंशपाश्च।**

**छिद्रैश्च पत्रैर्द्रुमगुल्मवल्ल्यो रूक्षाश्च दूरेऽम्बु निवेदयन्ति।।१०५।।**

शाकः, अश्वकर्णः, अर्जुनः, विल्वः, सर्जः, श्रीपर्णीः, अरिष्टा, धवः, शिंशपः एते सर्वे एव वृक्षविशेषो। यत्र छिद्रैः पत्रैः छिद्रसंयुक्तैः पर्णैर्भवन्ति, तथा द्रुमगुल्मवल्ल्यःछिद्रैश्च पत्रै रूक्षाश्च निःस्नेहा। दूरे अनिकटे अम्बु जलं निवेदयन्ति। तत्रातिदूरे जलं भवतीत्यर्थः।।

अन्यदप्याह-

**सूर्याग्निभस्मोष्ट्रखरानुवर्णा या निर्जला सा वसुधा प्रदिष्टा।**

**रक्ताङ्कुराः क्षीरयुताः करीरा रक्ता धरा चेज्जलमश्मनोऽधः।।१०६।।**

या वसुधाः भूः सूर्यस्यादित्यस्याग्नेर्वह्नेर्भस्मन उष्ट्रस्य करभस्य खरस्य गर्दभस्य एषामनुवर्णा सदृशप्रभा सा निर्जला जलरहिता प्रदिष्टोक्ता। तथा करीरवृक्षा यत्र रक्ताङ्कुरा लोहितैरङ्कुरैः संयुक्ताः क्षीरयुताः क्षीरसंयुक्ताः , धरा भूर्यदि च रक्ता लोहिवतवर्णा भवति, तत्राश्मनोऽधः पाषाणस्य तलेजलमुदकं भवति।।

अन्यदप्याह-

**वैदूर्यमुद्गमेचकाभा पाकोन्मुखोदुम्बरसन्निभा वा।**

**भङ्गञ्जनाभा कपिलाथवा या ज्ञेया शिला भूरिसमीपतोया।।१०७।।**

या शिला वैदूर्यमणेर्मुद्गानामम्बुदस्य मेघस्य मेचकस्य कुष्णवर्णस्य सदृशवर्णा, तथा या शिला पाकोन्मुखस्य सुपरिपक्वस्योदुम्बरस्य फलस्य सन्निभा सदृशी, या च शिला भङ्गे स्फोटने अञ्जनानभा अञ्जनसदृशी, अथवा कपिलवर्णा या च शिला, सा भूरिसमीपतोया भूरि प्रभूतं समीपं निकटं तोयं जलं यस्यां तथाभूता सापि शिला ज्ञेया ज्ञातव्या।।

अन्यदप्याह-

**पारावतक्षौद्रघृतोपमा या क्षौमस्य वस्त्रस्य च तुल्यवर्णा।**

**या सोमवल्ल्याश्च समानरूपा साप्याशु तोयं कुरुतेऽक्षयश्च।।१०८।।**

या च शिला पारावतस्य पक्षिणः सदृशीः क्षौद्रं माक्षिकं घृतमाज्यं तदुपमा तत्सदृशी, या च सोमवल्ल्याः समानरुपा सदृशवर्णा, सोमयाज्ञिकस्य वल्लीव। सापि शिला या आशु शीघ्रमेव अक्षयं स्थिरं तोयमुदकं कुरुते।।

अन्यदप्याह-

**ताम्रैः समेता पृषतैर्विचित्रैरापाण्डुभस्मोष्ट्रखरानुरूपा।**

**भृङ्गोपमाङ्गष्ठिकपुष्पिका वा सूर्याग्निवर्णा च शिला वितोया।।१०९।।**

या च शिला ताम्रैस्ताम्रवर्णैः पृषतैस्तिलकैः तथा विचित्रैर्नानावर्णस्तिलकैः समेता संयुक्ता , तथा चापाण्डुरा पाण्डुवर्णा। भस्मन उष्ट्रस्य करभस्य खरस्य गर्दभस्य चानुरूपा तत्सदृशवर्णा। भृङ्गोपमा भ्रमरसदृशवर्णा। अङ्गुष्ठिका विटपविशेषः तत्पुष्पसदृशी वा। नीललोहितेत्यर्थः। सूर्यस्यादित्यस्याग्नेश्च सदृशवर्णा या शिला सा वितोाया जलरहिता भवति।।

अन्यदप्याह-

**चन्द्रापतस्फटिकमौक्तिकहेमरूपा याश्चेन्द्रनीलमणिहिङ्गुलुकाञ्जनाभाः।**

**सूर्योदयांशुहरितालनिभाश्च याः स्युस्ताः शोभना मुनिवचोऽत्र च वृत्तमेतत्।।११०।।**

याः शिलाश्चन्द्रातपस्य चन्द्रप्रभायाः स्फटिकस्य स्फटिकमणेः। मौक्तिकस्य च मुक्ताहारस्य च वा। हैम्नः सुवर्णस्य च याः समानरुपाः सदृशवर्णाः। याश्च शिला इन्द्रनीलस्य मणः। हिङ्गुलुकस्य हिङ्गुलुकमिति रक्तवर्णमिति यत् प्रसिद्धम्। अञ्जनं कज्जलमतिकृष्णाः।

एतेषां सदृशी आभा कान्तिर्यासां तथा। याश्च सूर्योदयांशुीनभाः। सूर्यस्यादित्यस्योदयकाले यादृशा अंशवो रश्मयो दृश्यन्ते। तत्तुल्यवर्णा अतिरोहित इन्यर्थ। याह हरितालनिभाः स्युर्भवेयुः। ता : सर्वाः शोभनाः। अत्रास्मिन् प्रकरणे एतद्वक्ष्यमाणं वृतं मुनिवचः ऋषेर्वाक्य मित्यनेनागम-मनुसृतं भवतीति।।

ततश्च मुनिवचनमाह-

**एता ह्यभेद्याश्च शिलाः शिवाश्च यक्षैश्च नागैश्च स्वदाभिजुष्टाः।**

**येषां च राष्टेषु भवन्ति यथा राज्ञां तेषामवृष्टिर्न भवेत्।।११२।।**

शिला विदार्यमाणा यदा भेदं नैति न याति तदानीं तस्मिन् काले किं कुर्यात्? उच्यते- पलाशकाष्ठैः सह तिन्दुकानां वृक्षविशेषाणां काष्ठानि दारूणि प्रज्वालयित्वाऽनलमग्निं शिलापृष्ठगतं शिलां हुताशनवर्णामग्निवर्णां कृत्वा सुधाम्बुसिक्ता सुधा क्षीरं तत्संयुक्तेनाम्बुना जलेन सिक्ता संसेचिता प्रविदारमेति भेदमेति भेदमायाति।।

अन्यदप्याह-

**तोयं श्रितं मोक्षकभस्मना वा यत्सप्तकृत्वाः परिषेचनं तत्।**

**कार्यं शरक्षारयुतं शिलायाः प्रस्फोटनं वह्निवितापितायाः।।११३।।**

मोक्षको वृक्षः। यश्च मणीवकमिति प्रसिद्धः। तोयं जलम्। मोक्षकभस्मना यत्तोयं जलं श्रितं क्वथितं तच्छरक्षारयुतं शरभस्मना संयुक्तं कृत्वा तेन वह्निवितापितायाः पूर्वोक्तविधानेनाग्निसन्तप्तायाः सप्तकृत्वः सप्तवारं परिषेचनं कार्य सन्ताप्य ततः परिषेचनं कार्यम्। ततस्तस्याः प्रस्फोटन भेदनं भवति।।

अन्यदपि शिलाभेदनामाह-

**तक्रकाञ्जिकसुराः सकुलत्था योजितानि बदराणि च तस्मिन्।**

**सप्तरात्रमुषितान्यभितप्तां दारयन्ति हि शिलां परिषेकैः।।११४।।**

तक्रं मथितं काञ्जिकं सौवीरम्। सुरा प्रसिद्धा। एताः सकुलत्थाः कुलत्थसहिताः। तस्मिन् बदराणि बदरिफलानि च योजितानि मध्ये प्रक्षिप्तानि। एतानि सर्वाणि सप्तरात्रमुषितानि परिषेकैः प्रसेकैरभितप्तामभिसन्तापितां प्राग्विधिना शिलां विदारयन्ति स्फोटयन्ति।।

अन्यदप्याह-

**नैम्बं पत्रं त्वक्च नालं तिलानां सापामार्गं तिन्दुकं स्याद् गुडूची।**

**गोमूत्रेण स्त्रावितः क्षार एषां षट्कृत्वोऽतस्तापितो भिद्यतेऽश्मा।।११५।।**

नैम्बमिति। पत्रं त्वक् च नैम्बमेव। तिलानां नालं यस्मिन्नभ्यन्तरे कोशाकारे तिल भवन्ति। सापामार्गमपामार्गसहितं तिन्दुकफलं स्याद् भवेत्। गुडूची अमृता। एषामेकीकृतानां क्षारो भस्म गोमूत्रेण स्त्रावितः परिस्त्रावितः। तेनाश्मा पाषाणस्तापितः प्राग्विधिना षट्कृत्वः षड्वारं परिषेचनं कृत्वा भिद्यते।।

अधनुा शस्त्रपानमाह-

**आर्कं पयो हुडुविषाणमषीसमेतं पारावताखुशकृता च युतः प्रलेपः।**

**टङ्कस्य तैलमथितस्य ततोऽस्य पानं पश्चाच्छितस्य न शिलासुं**

**भवेद्विधातः।।११६।।**

अन्यदप्याह-

**क्षारे कदल्या मथितेन युक्ते दिनोषिते पायितमायसं यत्।**

**सम्यक् शितं चाश्मनि नैति भङ्गं न चान्यलोहेष्वपि तस्य कौण्ठयम्।।११७।।**

अथ वापीलक्षणमाह-

**पाली प्रागपरायताम्बु सुचिरं धत्ते न याम्योत्तरा**

**कल्लोलैरवदारमेति मरुता सा प्रायशः प्रेरितैः।**

**तां चेदिच्छति सारदारुभिरपां सम्पातमावारयेत्**

**पाषाणादिभिरेव वा प्रतिचयं क्षुण्णं द्विपाश्वादिभिः।।११८।।**

पाली वापी प्रागपरायता या पूर्वपश्चिमयोर्दिशोरायता दीर्धा सा सुचिरं बहुकालं अम्बु जलं धत्ते धारयति। याम्योत्तरा या पाली दक्षिणोत्तरयोदृिशोरायता सा सुचिरं चिरमम्बु न धत्ते, यतः सा मरुतो वायुना प्रायशो बाहुल्येन प्रेरितैः कल्लोलैर्जलसंक्षोभैरवदारं विनाशमेत्यायाति। तां याम्योत्तरायतां पालीं यदीच्छति कर्ता कर्तुं तदापां सम्पातं सारदारुभिरावारयेत्। पाल्यां जलेन सह यत्र सम्पर्कस्तत्र भित्तौ सारैर्दृढैर्दारुभिः काष्ठैरावरणं कुर्यात्। पाषाणादिभिरेव पाषाणैरश्मभिर्वा अपां सम्पातमावारयेत्। आदिग्रहणात् पक्वेष्टकादिभिः स्थूलैः शर्करैश्च। तत्र च प्रतिचयं चयं प्रति द्विपैर्गजैरश्वैस्तुरगैरादिग्रहणादुष्ट्रमहिष-बलीवर्दैः क्षुण्णं मर्दितं कार्यम्, येन सुदृढं भवति।।

---

१. राजवल्लभः (नारायणभारती), अ.४.२८

**वापी च नंदैकमुखात्रिकूटा षट्कूटिकायुग्ममुखा च भद्रा।**
**जयात्रिवक्त्रानवकूटयुक्ता त्वकैस्तुकूटैर्विजयामतासा।।[1]**

कीदृशं वाप्यास्तीरं कारयेदित्याह-

**ककुभवटाम्रपल्क्षकदम्बैः सनिचुलजम्बूवेतसनीपैः।**
**कुरबकतालाशोकमधूकैर्बकुलविमिश्रैश्चावृततीराम।।११९।।**

ककुभादयः सर्व एव वृक्षविशेषाः। ककुभः, वटः, आम्रः, प्लक्षः, कदम्बः- एतैः। किम्भूतै? सनिचुलजम्बूवेतसमनीपैः। निचुलेन, जप्ब्वा वेतसेन, नीपेन - एभिः सहितैः, संयुक्तैः। तथा कुरबकः, तालः, अशोकः, मधूकः- एतैरपि- किम्भूतैः? बकुल विमिश्रैर्बकुलसंयुक्तैः। एतैरावृतो व्याप्तस्तीरस्तटो यस्याः पाल्यास्तां तथाभूतां कारयेदिति।।

अथ नैर्वाहिकद्वारलक्षणमाह-

**द्वारं च नैवाहिकमेकदेशे कार्यं शिलासञ्जितवारिमार्गम्।**
**कोशस्थितं निर्विवरं कपाटं कृत्वा ततः पांशुभिरावपेत्तम्।।१२०।।**

एकदेशे एकस्मिन् स्थाने जलस्य नैर्वाहिकं द्वारं निर्गमनद्वारं कार्यम्। कीदृशम? शिलास-ञ्चितवारिमार्गम। शिलाभिः सञ्चितं पाषाणैश्चितं वारिमार्गं यत्र तत् तथाभूतम्। तच्च कोशस्थितं तले व्यवस्थितम्। तत्र च कपाटं निर्विवरं विवररहितं कृत्वा फलकमाच्छादनायोपरि दत्वा ततस्तं पांशुभिरावपेत् मृत्तिकाभिः स्थगयेदित्यर्थः।।

**चतुरस्त्रां वर्तुलां वा दीर्घां वा तां प्रकल्पयेत्।**
**त्रिदण्डं वा चतुर्दण्डं पञ्चदण्डमथापि वा।।**
**षडादिदशदण्डान्तं प्रमाणमिह योजयेत्।**
**चतुर्मुखां वा द्विमुखां कचिदेकमुखां तु वा।।[1]**

**दशहस्तप्रमाणं वाऽधिकं वा तलमध्यभाक्।**
**भित्तिकल्पनमत्रोक्तमैष्टिकं शैलकं तु वा।।**
**जालान्तिकेऽङ्गर्णकल्पमाद्यमेतदुदीरितम्।**
**द्वितीयाङ्गणकं वापि तृतीयाङ्गणकं तु वा।।**

१. विश्वकर्मवास्तुशास्त्रम् , अ.३३.२-३

**सपादं वा द्विपादं वा युक्त्या स्थापनमीरितम्।**

**कल्पनं दाढर्यसंयुक्तं पादसोपानमञ्जुलम्।।**

**मुखमण्डपयुक्तं वा कवाटादिसमन्वितम्।[1]**

अधुना द्रव्ययोगमाह-

**अञ्जनमुस्तोशीरैः सराजकोशातकामलकचूर्णैः।**

**कतकफलसमायुक्तैर्योगः कूपे प्रदातव्यः।।१२१।।**

अञ्जनं प्रसिद्धो वृक्षविशेषः। सौवीरक कृति केचित्। मुस्ता अब्दाः। उशीरं प्रसिद्धम्। एतैः किम्भूतैः? सराजकोशातकामलकचूर्णैः सह राजकोशातकेन अमलकचूर्णैन च। एतैरपि कतकफल-मायुक्तैः कतकफलेन सहितैः। ईदृशैर्योगो द्रव्यसंयोगः। स च द्रव्यसमायोगश्चूर्णीकृतः कूपे प्रदातव्यो देयः।।

अस्य गुणानाह-

**कलुषं कटुकं लवणं विरसं सलिलं यदि वा शुभगन्धि भवेत्।**

**तदनेन भवत्यमलं सुरसं सुसुगन्धि गुणैरपरैश्च युतम्।।१२२।।**

यत् सलिलं जलं कलुषमनिर्मलम् , कटुकं तिक्तम् लवणम्,विरसं विगतरसममृष्टम् , यदि वा अशुभगन्धि दुर्गन्धि भवेत् स्यात् ? तत् सलिलमनलयोगेनामलं निर्मलम्, सुरसं मृष्टम्, सुसुगन्धि शोभनगन्धि भवति, तथा अपरैश्चान्यैर्गुणैर्युतम, अकटुकालवणपरिणा-मकरैर्युत्, संयुक्तं भवति।।

अधुना नक्षत्राण्याह-

**हस्तो मघानुराधापुष्यधनिष्ठोत्तराणि रोहिणयः।**

**शतभिषगित्यारम्भे कूपानां शस्यते भगणः।।१२३।।**

हस्तः, मघा, अनुराधा, पुष्यः, धनिष्ठा, उत्तरास्तिस्त्र उत्तरफल्गुन्युत्तराषाढोत्तरभद्रपदा चेति एतानि, तथा रोहिण्यः, शतभिषक्शब्दो व्यवच्छेदाय। अयं भगणे नक्षत्रसमूहः कूपानामारम्भे शस्यते इष्यते।।

अपराजितपृचछाग्रनथे दशप्रकाराकाः कूपा वर्णिताः वर्तन्ते।

**श्रीमुखो विजयः प्रान्तो दुन्दुभिश्च मनोहरः।**

**चूडामणिश्च दिग्भद्रो जयो नन्दश्च शङ्करः।।**

---

१. विश्वकर्मवास्तुशास्त्रम्, अ.३३.४-६

**चतुर्हस्तादितो वृद्धिर्यावद्धस्तस्त्रयोदशम्।**

**श्रीमुखाद्याः शङ्करान्ता दश कूपाः प्रकीर्तिताः।।**[1]

**स्त्रीपुत्रादिकभोगसौख्यजननंधमार्थकामपदं**

**जंतुनांलयनंसुखास्पदमिदंशीतांबुधर्मावहम् ।।**

**वापीदेवगृहदिपुण्यमखिलंगेहात्सुत्पद्यते**

**गेहंपूर्वमुशंतितेनविबुधाः श्री विश्वकर्मादयः ।।**[2]

अधुना प्रतिष्ठिाविधानमाह-

**कृत्वा वरुणस्य बलिं वटवेतसकीलकं शिरास्थाने।**

**कुसुमैर्गन्धैर्धूपैः सम्पूज्यं निधापयेत् प्रथमम्।।१२४।।**

वरुणस्यापाम्यतेर्बलिमुपहारं कृत्वा विधाय वटवेतसकीलकं वटकीलकं वेतसकीलकं च कुसुमैः पुष्पैर्गन्धैर्गन्धद्रव्यैर्धूपैर्गुग्गुलप्रभृतिभः सम्पूज्याभ्यर्च्य प्रथममादौ शिरास्थाने शिराप्रदेशे विनिधापयेद् निखनेत् स्थिरं स्थापयेदिति।।

**कूपलक्षणम् -**

| **कमः** | **कूपस्य विस्तारः** | **कूपनाम** |
|---|---|---|
| १. | चतुर्हस्तम् | श्रीमुखः |
| २. | पञ्चहस्तम् | वैजयः |
| ३. | षट्हस्तम् | प्रान्तः |
| ४. | सप्तहस्तम् | दुन्दुभिः |
| ५. | अष्टहस्तम् | मनोहरः |
| ६. | नवहस्तम् | चुडामणिः |
| ७. | दशहस्तम् | दिग्भद्रः |
| ८. | एकादशहस्तम् | जयः |
| ९. | द्वादशहस्तम् | नन्दः |
| १०. | त्रयोदशहस्तम् | शङ्करः |
| ११. | चतुर्हस्ततः न्यूनम् | कूपिका |

१. राजवल्लभ, श्लोक-४

२. राजवल्लभः (नारायणभारती), अ.४.२७

## ३. रत्नपरीक्षाध्यायः

तत्र मणीनां तावद्गुणप्रधानार्थलक्षणमाह-

**रत्नेन शुभेन शुभं भवति नृपाणामनिष्टमशुभेन।**

**यस्मादतः परीक्ष्यं दैवं रत्नाश्रितं तज्ज्ञैः।।१।।**

नृपाणां राज्ञां रत्नेन मणिना शुभेन शुभलक्षणेन संयुक्तेन शुभं दैवं भवतिः, अशुभेनाष्टिम् शुभं दैवं भवति। दैक्शब्देन प्राक्तनकर्मणां विपाक उच्यते। यस्मादेवमतोऽस्मात्तज्ज्ञै रत्नलक्षणज्ञै रत्नाश्रित रत्नसंस्थितं दैवं परीक्ष्यं विचार्यम्।।

रत्नपरीक्षायामुपलरत्नानामधिकारः क्रियत इत्येतदाह –

**द्विपहयवनितादीनां स्वगुणविशेषेण रत्नशब्दोऽस्ति।**

**इह तूपलरत्नामधिकारो वज्रपूर्वाणाम्।।२।।**

द्विपो हस्ती। हयोसश्वः। विनता स्त्री। अधिकरणाज्जातौ यदुत्कृष्टं रत्नं तदभिधीयते। एवमादीनां स्वगुणविशेषेणात्मीयगुणप्रभावेण रत्नश्ब्दोऽस्ति विद्यते। तथा च

जातौ जातौ यदुत्कृष्टं तद्रत्नमभिधीयते। इति।

इह त्वस्यां रत्नपरीक्षायुपलरत्नानां पाषाणमणीनां वज्रपूर्वाणां वज्रप्रथमानामधिकारः क्रियते।।२।।

तत्र रत्नानामुत्पत्तिप्रदर्शनार्थं मतभेमाचार्याणामाह-

**रत्नानि बलाद्दैत्याद्दधीचितोऽन्ये वदन्ति जातानि।**

**केचिद् भुवः स्वभावाद् वैचित्र्यं प्राहुरुपलानाम्।।३।।**

बल इति दैत्याख्यस्तस्माद्वबालद्रत्नानि सम्भूतानि। स किलेन्द्रेण निहतस्तस्यास्थिभ्यो रत्ना-न्युत्पन्नानि। तथा च-

सम्भूतानि बलाद्दैत्याद्रत्नानि विविधानि च।

गतानि नानावर्णत्वमस्थिभ्यो भूमिसंश्रयात्।।

दधीचितोऽन्य इति। अन्येऽपरे दधीचिमुनेरस्थिभ्यो जातानीति वदन्ति। तथा च

रत्नानि दधीचमुनेर्जातानि सहस्त्रशो लोके।

अस्थिभ्यो भूमिवशाद् नानावर्णत्वमागतानि गुणैः।।

केचिदिति। केचिदन्ये आचार्या भुवो भूमेः स्वभावाज्जातानि रत्नानि विविधानि च। उपला रत्न-रूपत्वं प्राप्ताः कालान्तरेतेति प्राहुरुक्तवन्तः।।

अथ रत्नानां नामान्याह-

**वज्रेन्द्रनीलमरकतकर्केतरपद्मरागरुधिराख्याः।**

**वैदूर्यपुलकविमलकराजमणिस्फटिकशशिकान्ताः।।४।।**

**सौगन्धिकगोमेदकशङ्खमहानीलपुष्परागाख्याः।**

**ब्रह्ममणिज्योतीरससस्यकमुक्ताप्रवालानि।।५।।**

वज्रेन्द्रनीलेति। वज्रम्। इन्द्रनीलः। मरकतः। कर्केतरः। पद्मरागः। रुधिराख्यः। वैदूर्यम्। पुलकः। विमलकः। राजमणी राजवान्। स्फटिकः। शशिकान्तश्चन्द्रान्तः।सौगन्धिकः। गोमेदकः। शङ्खः। महानीलः। पुष्परागाख्यः। ब्रह्ममणि। ज्योतीरसः। सस्यकः। मुक्ता मुक्ताफलानि। प्रवालं विद्रुमः। एतानि रत्नभेदानि। इत्यत उत्कृष्टानि चत्वारि वज्रमुक्तापद्ममरागमकताख्यानि, तेषामेव लक्षणमाचार्यः करोतीति सम्बन्धः ।।

अथ वज्रमणेः सप्ताकारस्थानानि लक्षणं चाह-

**वेणातटे विशुद्धं शिरीषकुसुमप्रभं च कौशलकम्।**

**सौराष्ट्रकमाताम्रं कृष्णं सौर्पारकं वज्रम्।।६।।**

**ईषत्ताम्रं हिमवति मतङ्गजं वल्लपुष्पसङ्काशम्।**

**आपीतिं च कलिङ्गे श्यामं पौण्ड्रेषु सम्भूतम्।।७।।**

वेणा नाम नदी तस्यास्तटे तीरे विशुद्धं दोषरहितम्। शिरीषकुसुमप्रभं शिरीषकुसुमसङ्काशं श्वेतपीत वर्णं तत्कौशलकं कोशलदेशसम्भूतम्। वज्रमाताम्रमाताम्रवर्णमी-षल्लोहितम्, तत्तु सौराष्ट्रं सुराष्ट्रसम्भूतं वज्रम्। वज्रं कृष्णं कृष्णवर्णं सौर्पारकं सौर्पारदेशे सम्भूतं जातम्।

ईषत्ताम्रमिति। ईषत् किञ्जित्ताम्रं ताम्रवर्ण वज्रं हिमवति पर्वते हिमवत्सम्भूतम्। वल्लपुष्पसङ्काशं वल्लपुष्पनिभमीषत्पाण्डुरं मतङ्गजं मतङ्गदेशसम्भूतम्। आपीतं पीतवर्णं कलिङ्गे कलिङ्गदेशोद्भवं वज्रम्। श्यामं श्यामवज्रं पौण्ड्रेषु सम्भूतं पौण्ड्रदेशजातमिति।।

अथैतेषां दैवत्यमाह-

**ऐन्द्रं षडश्रि शुक्लं याम्यं सर्पास्यरूपमसितं च।**

**कदलीकाण्डनिकाशं वैष्णवमिति सर्वसंस्थानम्।।८।।**

**वारुणमबलागुह्योपमं भवेत् कर्णिकारपुष्पनिभम्।।९।।**

**शृङ्गाटकसंस्थानं व्याध्राक्षिनिभं च हौतभुजम्।**

**स्त्रोतः खनिः प्रकीर्णकमितयाकरसम्भवस्त्रिविधः।।१०।।**

ऐन्द्रमिति। यद्वज्रं षडश्रि षड्भिरश्रिभिर्युक्तम्। षट्कोणमित्यर्थः। शुक्लं शुक्लवर्णम्। तदैन्द्रमं। इन्द्रो देवतास्येन्द्रम। यच्चासितं कृष्णवर्णं सर्पास्यरूपं भुजङ्गमुखसदृशम् तद्याम्यं यमदैवतम्। यच्च कदलीकाण्डनिकाशं नीलपीतमित्यर्थः। सर्वसंस्थानं सर्वाण्यशेषाणि संस्थानानि यस्य, सर्वाकारम्। तद्वैष्णवं विष्णुदैवत्यम्।

वारुणमिति। अबला स्त्री तस्या गृह्यं वराङ्गं तदुपम ˙ तद्विकारस्त्रीमणिसदृशम्, तद्वारुणम्। कर्णिकारपुष्पनिभम्, कर्णिकारो वृक्षस्तत्कुसुमप्रभम्। शृङ्गाटकसंस्थानं त्र्यस्त्रम्। व्याघ्राक्षिनिभं व्याघनेत्रसदृंशं नीललोहितम्, तद्वजं हौतभुजमाग्नेयम्।

वायव्यं चेति। यद्वज्रं यवोपमं यवाकारं मध्यस्थूलम्। अशोककुसुमप्रभशोकपुष्पसदृशं लोहितवर्णं तद्वायव्यं वायुदैवत्यमुक्तम। स्त्रोतः खनिः प्रकीर्णकमिति। श्रोतो यतो जलं स्त्रवति। खनिः खन्यत इति खनिः खातम्। प्रकीर्णकं यस्या भूमौ मणयो भवन्ति। समुद्रे यथा। एवं स्त्रोतः खनिः प्रकीर्णकमिति त्रिविधः त्रिपकार आकरसम्भवो वज्रस्येति।।

अथ ब्राह्मणादीनां कीदृशं वज्रं प्रशस्यत इत्याह-

**रक्तं पीतं च शुभं राजन्यानां सितं द्विजातीनाम्।**

**शैरीषं वैश्यानां शूद्राणां शस्यतेऽसिनिभम्।।११।।**

रक्तं रक्तवर्णं पीतं च राजन्यानां क्षत्रियाणां शुभं प्रशस्तम्। सितं श्वेतवर्णं द्विजातीनां ब्राह्मणानां शुभम्। शैरीषं शिरीषकुसुमसदृंशं वैश्यानां शुभम्। असिनिभं खड्गसदृशं कृष्णमित्यर्थः। शूद्राणां स्तूयते।। शुभमित्यर्थः।।

अधुनास्य वज्रमणेर्मूल्यपरिज्ञानार्थमाह-

**सितसर्षपाष्टकं तण्डुलो भवेत्तण्डुलैस्तु विंशत्या।**

**तुलितस्य द्वे लक्षे मूलयं द्विद्वयुनिते चैतत्।।१२।।**

**पादत्र्यंशाधनं त्रिभागपञ्चांशषोडशांशाश्च।**

**भागश्च पञ्चविंशः शतिकस्साहस्त्रिकश्चेति।।१३।।**

सितसर्षपाष्टकमिति। सितसर्षपा गौरसर्षपाः। तैरष्टभिस्तण्डुजो भवति। विंशत्या तण्डुलैश्च यद्वज्रं तुलितं परिच्छिन्नं तस्य द्वे लक्षे कार्षापणानां मूल्यम्। अशीत्या श्वेतिकानां पणः पणविंशत्या कार्षापणः। तथा च-

द्विद्वनिते चैतदिति। तस्मिन्नेव वज्रे द्विद्वयूनिते द्वाभ्यां द्वाभ्यां तण्डुलाभ्यामूनिते रहिते। एतद्वक्ष्यमाणम्।

पादत्र्यंशार्धोनमिति। विंशतिद्वर्युनाष्टादश। अष्टादशभिस्तण्डुलैर्यद्वज्रं तुलिसं तस्य कार्षापण-लक्षद्वयं पादोनं मूल्यम्। सार्द्धलक्षमित्यर्थः। यत्षोऽशभिस्तण्डुलैस्तुलितं तस्य लक्षद्वयं त्र्यंशोनं त्रिभागरहितं मूल्यम्। लक्षमेकं त्रयस्त्रिंशत्सहस्त्राणि शतत्रयं त्रयस्त्रिंशदधिकं सत्रिभागमित्यर्थः। चतुर्दशभिस्तण्डुलैस्तुलितं तस्यार्धोनं लक्षद्वयं लक्षमेकमित्यर्थः। द्वादशभिस्तण्डुलैस्तुलितस्य लक्षद्वयत्रिभागो मूल्यम्। षड्षष्टिसहस्त्राणि षट्शतानि सप्तषष्ट्यधिकानि त्रिभागक्षय इत्यर्थः। दशभिस्तुलितस्य लक्षद्वयपञ्चांशो मूल्यम्। चत्वारिंशत्सहस्त्राणीत्यर्थः। अष्टाभिस्तण्डुलैस्तुलितस्य लक्षद्वषोडशांशो मूल्यम्। द्वादशसहस्त्राणि पञ्चशतानीत्यर्थः। षड्भिस्तण्डुलैस्तुलितस्य लक्षद्वयात् पञ्चविंशतिको भागो मूल्यम्। अष्टौ सहस्त्राणितयर्थः। चतुर्भिस्तण्डुलैस्तुलितस्य लक्षद्वयाच्छतभागो मूल्यम्। सहस्त्रद्वयं कार्षापणानामित्यर्थः। अन्तरे स्वबुद्धया व्यस्तत्रैराशिकेन मूल्यमैूमिति।।

अथ शुभवज्रलक्षणान्याह-

**सर्वद्रव्योभेद्यं लध्वम्भसि तरति रश्मिवत् स्निग्धम्।**

**तडिदनलशक्रचोपापमं च वज्रं हितायोक्तम्।।१४।।**

यद्वज्रं सर्वद्रव्याभेद्यं न केनचिच्छस्त्रादिनापि भिद्यते। लघु गौरववर्जितम्। अम्भसिजले तरति निमज्जतीत्यर्थः। रश्मिवत् रश्मयः किरणा विद्यन्ते यस्य तत्। स्निग्धं स्नेहसंयुक्तम्। तडिद विद्युत अनलोऽग्निः। शक्रचापमिन्द्रधनुः। एषामुपमं सदृशं तद्वज्रं हितायोक्तं श्रेयसे कथितम्।।

अथाशुभलक्षणमान्याह-

**काकपदमक्षिकाकेशधातुयुक्तानि शर्करैर्विद्धम्।**

**द्विगुणाश्रि दग्धकलुषत्रस्तविशीर्णानि न शुभानि।।१५।।**

यानि वज्राणि काकपदैः काकपदाकृतिभिश्चिह्नैः। मक्षिकाभिस्तदाकृतिभिः। केशैर्बालसदृशरेखाभिः। धातुभिर्मृत्तिकाभिः। एतैर्युक्तानि। तथा यच्छर्करैर्युक्तं यच्च विद्धं

वेधसंयुक्तम्। यच्च द्विगुणाश्रि लक्षणाभिर-श्रिभिर्द्विगुणाभिर्युक्तम्। दग्धमग्निना। कलुषं विवर्णम्। त्रस्तं विगतकान्ति। विशीर्णं जर्जरितम्। एतानि न शुभानि, अशोभनानि।।

अन्यदप्याह-

**यानि च बुद्बुददलिताग्रचिटिपवासीफलप्रदीर्धाणि।**

**सर्वेषां चैतेषां मूल्याद् भागोऽष्टमो हानिः।।१६।।**

यानि च वज्राणि बुद्बुदानि जलबुद्बुदसदृशानि। दलिताग्राणि दलितं विदारितमग्रं प्रान्तं येषाम्। चिपिटानि चर्पटानि। वासीफलवत्प्रदीर्धाति वासिका द्रव्यविशेषः। एतेषां सर्वेषां प्राग्विधानेन यन्मूल्यं भवति। तस्मादष्टमो भागो हानिर्भवति। अष्टमभागोनं मूल्यं भवतीत्यर्थः।।

अथ वज्रमणेर्धारणे गुणानाह-

**वज्रं न किञ्चिदपि धारयितव्यमेके पुत्रार्थिनीभिरबलाभिरुशन्ति तज्ज्ञाः।**

**श्रृङ्गाटकत्रिपुधान्यकवत स्थितं यत् श्रोणीनिभं च शुभदं तनयार्थिनीनाम्।।१७।।**

वज्रं वज्रमणिरबलाभिः स्त्रीभिः पुत्रार्थिनीभिः सुताभिलाषिणीभिर्न किञ्चिदपि धारयितव्यामित्येके आचार्या उशन्ति कथयन्ति। यच्छृङ्गाटकाकारं त्र्यस्त्रत्। त्रिपुटं त्रिभिः पुटैर्युक्तम्। धान्यकबद्धान्यफालवल-त्स्थितम्। श्रोणीनिभं स्त्र्यधररागसदृशम्। तत्तनयार्थिनीनां शुभदम्। तथाच-

अन्यदप्याह-

**स्वजनविभवजीवितक्षयं जनयति वज्रमनिष्टलक्षणम्।**

**अशनिविषभयारिनाशनं शुभमुपभोगकरं च भूभृताम्।।१८।।**

अनिष्टलक्षणमशुभलक्षणसंयुक्तं वज्रं वज्रमणिः स्वजनानां बान्धवानां विभवस्यैश्वर्यस्य जीवित-स्यायुषः क्षयं हानिं जनयुत्युत्पादयति। शुभलक्षणं वज्रमशनिभयं विद्युद्भीतिम्। विषभयम्। अरिभयं शत्रुयभं च नाशयति। भूभृतां राज्ञामुपभोगकरं भवति। केचिदुरुभोगकरं विस्तीर्णभोगकरमितीच्छन्ति।।

## ४. मुक्तालक्षणाध्यायः

तत्रादावेव मुक्ताफलानामुत्पत्तिप्रदर्शनार्थमाह-

**द्विपभुजगशुक्तिशङ्खाभ्रवेणुतिमिसूकरप्रसूतानि।**

**मुक्ताफलानि तेषां बहुसाधु च शुक्तिजं भवति।।१।।**

द्विपो हस्ती। भुजगः सर्पः। शुक्तिः प्राणिविशेषः। शङ्खः प्राणी। अभ्रं मेघः। वेणुर्वशः। तिमिर्मत्स्यः। सूकरो वराहः। एभ्यः प्रसूतानि उत्पन्नानि मुक्ताफलानि भवन्ति। तेषां सर्वेषां मध्याच्छुक्तिजं शुक्तिसम्भूतं बहुंसाध्वतिश्रेष्ठं भवति। प्राचुर्येण व्यवहारीत्यर्थः।।

अथ मुक्ताफलानामष्टावाकरानाह-

**सिंहलकपारलौकिकसौराष्ट्रिकताम्रपर्णिपारशवाः।**

**कौबेरपाण्ड्यवाटकहैमा इत्याकरास्त्वष्टौ।।२।।**

सिंहलको देशः। परलोको, देशः, तत्र भवः पारलोकिकः। सौराष्ट्रिकः। सुराष्ट्रको देशभेदः। ताम्रपर्णी नदी। पारशवो देशः। कौबेरो देशः। पाण्डयवाटको देशः। तत्र भवाः। हैमा हिमभवाः। इत्येवं प्रकारा अष्टौ मुक्तफलानामाकार उत्पत्तिस्थानानि।।

अथैतेषां लक्षणमाह-

**कृष्णाः श्वेताः पीताः सशर्कराः पारलौकिका विषमाः।**

**न स्थूला नात्यल्पा नवनीतनिभाश्च सौराष्ट्राः।।३, ४।।**

**विषमं कृष्णश्वेतं लधु कौबरे प्रमाणतेजोवत्।**

**निम्बफलत्रिपुटधान्यकचूर्णाः स्युः पाण्डयवाटभवाः।।५,६।।**

बहुसंस्थाना इति। या मुक्ता बहुसंस्थाना बहुप्रकारसंस्थानमाकारो यासाम्। स्निग्धा निर्मलाः। हंसाभा हंसवर्णसदृशकान्तयः। स्थूला बहृत्यस्ताः सिंहलाकराः सिंहलआकारो यासाम्। ईषत्ताम्राः किञ्चिताम्रवर्णाः। श्वेताः शुक्लाः। तमोवियुक्तास्तमोविरहिता निर्मला इत्यर्थः। तास्ताम्राख्यास्ताम्र-पर्णभवााः।

कृष्णाः श्वेता इति कृष्णाः कृष्णवर्णाः। श्वेताः सिताः। पीताः पीतवर्णाः। सशर्करा धातुयुक्ताः। विषमाश्चासमाः। ताः पारलौकिकाः परलोकभवाः। याश्च नातिस्थूला नातिबृहत्यः, नात्यल्पा नातिसूक्ष्माः। नवनीतनिभा नवनीतकान्तयस्ता : सौराष्ट्राः।

ज्योतिष्मत्य इति। या मुक्ता ज्योतिष्मत्यस्तेजोयुक्ताः। शुभ्राः श्वेताः गुरवोऽतिगौरवयुक्ताः। महागुणा महद्भिर्गुणैर्युक्ताः ताः पारशवाः। लघु स्वल्पम्। जर्जरं विवर्णम्। दधिनिभं दधिसदृशम्। बृहद्विस्तीर्णम्। द्विसंस्थानं द्वे संस्थाने यस्य तद्धेमं हिमवति सम्भूवतम्।

विषमतिति। विषममसमम्। कृष्णश्वेतँ च। लघु गौरववर्जितम्।

प्रमाणतेजोवत्। प्रमाणं महत्त्वं तेजश्च कान्तिर्विद्यते यस्मिंस्तत्। निम्बफलसदृशम्। त्रिपुटं त्रिभिः पुटैरुपलक्षितम्। धान्यकं धान्यकाफलसदृशम्। चूर्णं चातिसूक्ष्मम्। एताः सर्वा एव मुक्ताः पाण्डयवाटभवाः पाण्डयवाटे जाताः स्युर्भवेयुः।।

अथैतेषां विशेषमाह-

**परिणतदाडिमगुलिकागुञ्जाताम्रं ज वायुदैवत्यम्।**

**निर्धूमानलकमलप्रभं च विज्ञेयमाग्नेयम्।।७, ८।।**

अतसीकुसुमश्याममिति। अतसीकुसुममतिप्रसिद्धं तद्वत् श्यामं यन्मुक्ताफल तद्वैष्णवं विष्णुदैवत्यम्। शशाङ्कसङ्कासं चन्द्राभं तदैन्द्रम्। यच्च हिरतालनिभं हरितालवर्णं तद्वारुणम्। यच्चास्तिं कृष्णं तद्यमवैदत्यम्।

परिणतदाडिमगुलिकागुञ्जाताम्रं चेति। परिपक्वदाडिमगुञ्चाफलरक्तं यत्तद्वायुदैवत्यं वायव्यम्। निर्धूमस्य धूमरहितस्यानलस्याग्नेः सदृशी प्रभा कान्तिर्यस्य तथा कमलस्य पद्मस्य च सदशृप्रभं यत्तदाग्नेयमग्निदैवत्यं विज्ञेयम्।।

अथैतेषां मूल्यपरिज्ञानार्थनाह-

**माषकदलहान्यातो द्वात्रिंशद्विशतिस्त्रयोदश च।**

**अष्टौ च शतानि शतत्रयं त्रिपञ्चाशता सहितम्।।९, १०।।**

**गुञ्जात्रयस्य मूल्यं पञ्चाशद्रूपकां गुणयुतस्य।**

**रूपकपञ्चत्रिंशत्त्रयस्य गुञ्जार्धहीनस्य।।११, १२।।**

माषकचतुष्टधृतस्येति। एकस्य मुक्ताफलस्य तेजोगुणयुक्तस्य गुणान् वक्ष्यति- स्निग्धः प्रभानुलेपी त्याद्येवं माषकचतुष्टयेन धृतस्य तुलितस्य त्रिपञ्चाशत्कार्षापणाः शताहताः शतगुणिता मूल्यम्। त्रिपञ्चा-शत्कार्षापणशतानीत्यर्थः।

माषकदलेति। अतोऽस्मान्माषकचतुष्टयधृतान्मुक्ताफलान्माषकदलहान्या माषका-र्धोनितया एत-द्वक्ष्यमाणं मूल्यम्। तद्यथा- सार्धौस्त्रिभिर्माषकैस्तुलितस्य द्वात्रिंशत्कार्षापण-

शतानि मूल्यम्। त्रिभिर्माष-कैस्तुलितस्य विंशतिकार्षापणशतानि मूल्यम्। द्वाभ्यां सार्धाभ्यां तुलितस्य त्रयोदशकार्षापणशतानि। द्वाभ्यां तुलितस्याष्टौ शता। अध्यर्धेन माषकेण तुलितस्य त्रिपञ्चांशदधिकं शतत्रत्रं कार्षापणानां मूल्यम्।

एकेन माषकेण तुलितस्य पञ्चत्रिंशदकिधं शतं कार्षापणानां मूल्यम्। चत्वारः कृष्णलानवति-मूल्या इति। पञ्चकृष्णला एको माष इति। कृष्णलाशब्देन गुञ्जा उच्यते। यस्य मुक्ताफलस्य चत्वारः कृष्णला धृतं रूपम्, तस्य नवतिः कार्षापणा मूल्यम्। यस्य मुक्ताफलस्य रूपं प्रमाणं सार्धास्तिस्त्रो गुज्जा धृतम्, तस्य सप्तमिमूल्यम्। सप्ततिः कार्षापणास्तस्य मूल्यमित्यर्थः।

गुज्जात्रयस्येति। गुणयुक्तस्य सगुणस्य गुज्जात्रयस्य पञ्चाशद्रूपका मूल्यम्। रूपकाः सुप्रसिद्धा एव। गुञ्जात्रयस्य गुञ्जार्धहीनस्य पञ्चत्रिंशद्रूपका मूल्यम्।।

अथान्यन्मूल्यपरिज्ञानमाहअ

**षोडशकस्य द्विशती विंशतिरूपस्य सप्ततिः सशता।**

**यत्पञ्चविंशतिधृतं तस्य शंत त्रिंशता सहितम्।।१३, १४।।**

**मुक्ताशीत्यां त्रिंशच्छतस्य सा पञ्चरूपकविहीना।**

**द्वित्रिचतुः पञ्चशता द्वादशषट्पञ्चकत्रितयम्।।१५, १६।।**

पलदशभागो धरणमिति। पञ्चकृष्णलको माषस्ते सुवर्णस्तु षोडश। पलं सुवर्णाश्चतवारः इति। एवं पलस्य यो दशभागः स धरणमित्युच्यते। तद्धरणं यदि त्रयोदश मुक्ताः सुरूपा गुणसंयुता भवति, तदा सपञ्चविंशा त्रिंशती रूपकसंख्याकृतं गूल्यम्। त्रयाणां शतानां समाहारस्त्रिशती। सह पञ्चविंशत्या वर्तते या सा सपञ्चविंशा।

षोडशकस्येति। मुक्ताषोसशयुक्तस्य चेद्धरणं तदा द्विशती रूपकसंख्याकृतं मूल्यं भवति। एवं विशंतिरूपस्य सप्ततिः सशता। मुक्ताविंशतेर्धरणधृतायाः सप्तत्यधिकं शतं मूल्यम्। पञ्चविंशतिमुक्ताया धृतं धरणं भवति, तस्य त्रिंशता सहित शतं मूल्यमिति।

त्रिंशन्मुक्ता यद्धरणं भवति तस्य सप्ततिमूल्यम्। वत्वारिशन्मुक्ता यद्धरणं तस्य शतार्धं पञ्चाशद्रूपका मूल्यम्। अत्र वाशब्दश्चार्थे। यच्च षष्टिः पञ्चोना वा पञ्चपञ्चाशन्मुक्ता धरणं भवति, तस्य पञ्चाष्टकमष्टौ पञ्चकाः। चत्वारिंशन्मूल्यमित्यर्थः।

मुक्ताशीत्येति। मुक्ताशीत्या धृतस्य धरणस्य त्रिंशद्रैपकमूल्यम्। मुक्ताशतधृतस्य सा त्रिशंत्पञ्च-रूपकविहीना पञ्चविंशतिरुपका मूल्यम्। द्विशतधरणस्य द्वादशरूपकाः।

त्रिशतधरणस्य षड्रूपकाः। चतुः शतधरणस्य रूपकपञ्चकम्। पञ्चशतधरणस्य त्रितयं रूपकाणां मूल्यमिति।।

अधुना त्रयोदशाद्यानां धरणानां संज्ञार्थमाह-

**पिक्कापिच्चार्घार्धा रवकः सिक्थं त्रयोदशाद्यानाम्।**

**संज्ञाः परतो निगराश्चूर्णानश्चाशीतिपूर्वाणाम्।।१७।।**

त्रयोदशाद्यानां धरणानां पिक्काद्या संज्ञाः। तद्यथा- त्रयोदशमुक्ताधृतस्य धरणस्य पिक्केति संज्ञा। षोडशकस्य पिच्चा। विंशतिकस्यार्घा। पञ्चविंशतिकस्यार्धा। त्रिंशत्कधृतस्य रवकः। चत्वारिंशत्कस्य सिक्थम्। परतोऽन्तरं पञ्चपञ्चाशत्कस्य निगरा। अशीतिपूर्वाणां सर्वधरणानां चूर्णा इति संज्ञा। एतांश्चाकरस्थाने व्यहारार्थमुपयुज्यन्ते।।

अथोत्तराणां मूल्यपरिज्ञानमाह-

**एतद्गुणयुक्तानां धरणधृतानां प्रकीर्तितं मूल्यम्।**

**परिकल्प्यमन्तराले हीनगुणानां क्षयः कार्यः।।१८।।**

**कृष्णश्वेतपीतकताम्राणामीषदपि च विषमाणाम्।**

**त्र्यंशोनं विषमकपीतयोश्च षड्भागदलहीनम्।।१९।।**

एतदिति। गुणयुक्तानां मुक्ताफलानां धरणधृतानामेतद्यथोक्तं मूल्यम्। अन्तराले मध्ये परिकल्प्यं स्वबुद्धया मूल्यमूह्यम्। यथा त्रयोदशकरस्य धरणस्य त्रिशती सपञ्चविंशा उक्ता। षोडशकस्य द्विशती। अन्तराले मध्ये चतुर्दशधृतस्य पञ्चदशधृतस्य वा व्यस्तत्रैराशिकेन मूल्यानयनं कार्यमत्यिर्थः। हीनगुणानां वक्ष्यमाणेनैवं क्रमेण क्षयः कार्य।

कृष्णश्वेतिकेति। ईषदिति प्रत्येकमभिसम्बध्यते। ईषत्किञ्चित्कृष्णानामसितवर्णानाम् ईषच्छुक्ला-नामीषत्ताम्राणामीषद्विषमाणां प्राग्विधानेन यन्मूल्यं तदेव त्र्यंशोनं त्रिभागहीनं तेष मूल्यं भवति। विषय-कपीतयोश्च यथासंख्यं षड्भागदलहीनम्। अतिविषयमस्य षड्भागहीनं पीतस्यार्धहीनमिति।।

अथ गजमुक्ताफललक्षणमाह ।

**तेषां किल जायन्ते मुक्ताः कुम्भेषु सरदकोशेषु।**

**बहवो बृहत्प्रमाणा बहुसंस्थानाः प्रभायुक्ताः।।२०, २१।।**

**नैषामर्घः कार्यो न च वेधोऽतीव ते प्रभायुक्ताः।**

**सुतविजयारोग्यकरा महापवित्रा धृता राज्ञाम्।।२२।।**

ऐरावतकुलजानामिति। ऐरावतो नाम हस्ती, तस्य कुले वंशे जाता येगजास्तेषां तद्वंशप्रभवाणां तद्वंशप्रसूतानां गजानां च प्रजाताः पुष्ये पुष्यनक्षत्रे श्रवणे च नक्षत्रे। इन्दुदिने चन्द्रवासरे सूर्यदिवस` अर्कवासरे यद्युत्पद्यन्ते। ये चैते गजा उतरायणभवा उतरायणे जाताः। अर्केन्द्वोः सूर्याचन्द्रमसोश्च ग्रहण उपरागेच ये जातास्ते भद्रेभाः, भद्रनामानस्ते गजाः।

तेषामिति। किलत्यागमदर्शनार्थम्। तेषामैरावतकुलजानां तथा भद्रेभानां कुम्भेषु मस्तकेषु सरदकोशेषु दन्तकोशसंयुक्तेषु मुक्ता जायन्ते उत्पद्यन्ते च। बहवः प्रभूता बृहत्प्रमाणाः स्थूलाः। बहुसंस्थाना अनेकाकाराः। प्रभायुक्तस्तेजस्विन्यः।

नैशामर्धः कार्य इति। तेषां मुक्ताफलानामर्घो मूल्यं न कार्यं न वेधस्तेषां कार्यः। यतस्यताः सर्वा अतीवात्यर्थं प्रभायुक्तास्तेजस्विन्यो महापवित्रा अतिसाधना राज्ञां नृपाणां धृता देहस्थिताः सुतविजया-ऽऽरोग्यकरा भवन्ति। सुताः पुत्राः। विजयः शत्रुनिग्रहः। आरोम्यं नीरोगत्वं च कुर्वन्ति।।

अथ वराहस्य मुक्ताफलस्य तिमिजस्य च लक्षणमाह-

**दंष्ट्रामूले शशिकान्तिसप्रभं बहुगुणं च वाराहम्।**

**तिमिजं मत्स्याक्षिनिधं बृहत् पवित्रं बहुगुणं च।।२३।।**

वराहाणां सूकराणाम्। दंष्ट्रामूलं यतो दंष्ट्रोत्पद्यते तत्र शशिकान्तिसप्रभं चन्द्रप्रभाभं बहुगुण-मनेकगुणं वाराहं वराहसम्भूतं तन्मुक्ताफलं भवति। मत्स्याक्षिनिभं मीननेत्रसदृशं तिमिजं मत्स्यजं भवति। बृहत् स्थूलम्। पवित्रं पावनम्। बहुगुणं च तज्ज्ञेयमिति।।

अथ मेघसम्भूतस्य मुक्ताफलस्य लक्षणमाह-

**वर्षोपलवज्जातं वायुस्कन्धाच्च सप्तमाद् भ्रष्टम्।**

**ह्रियते किल खाद् दिव्यैस्तडित्प्रभं मेघसम्भूतम्।।२४।।**

वर्षे उपलो वर्षोपलः। वर्षोपलवज्जातम्। यथा वर्षमध्ये उपला जायन्ते तद्वत् सप्तमाद्वायु-स्कन्धाद् भ्रष्टं पतितम्। किलेत्यागमार्थम्। दिवि भवा दिव्याः। खादन्तरिक्षात् पतमानं दिव्यैराकाशस्थैर्देवयो-निभिर्ह्रियते। तडित्प्रभं विद्युत्कान्तिसदृशं मेघसम्भूतमभ्रजं मुक्ताफलम्।।

अधुना नागजमुक्ताफलस्य लक्षणमाह-

**तक्षकवासुकिकुलजाः कामगमा ये च पन्नगास्तेषाम्।**

**स्निग्धा नीलद्युतयो भवन्ति मुक्ताः फणस्यान्ते।।२५।।**

तक्षकवासुकिकुलजा इति। ये पन्नागास्तक्षकवासुकिकुलजाः। तक्षककुले वासुकिकुले जाताः। कामगमा इच्छागामिनो ये च। तेषां नागनां फणस्यान्ते शिरः पर्यन्ते मुक्ताः स्निग्धाः सस्नेहा नीलद्युतयो नीलकान्तयो भवन्ति।।

**शस्तेऽवनिप्रदेशे रजतमये भाजने स्थिते च यदि।**

**वर्षति देवाऽकस्मात् तज्ज्ञेयं नागसम्भूतम्।।२६।।**

शस्त इति। कथं नागजं मुक्ताफलं ज्ञातव्यम्? ज्ञायते तत्प्रत्ययार्थमिदमाह- यस्मिन् मुक्ताफले शस्ते प्रशस्तेऽवनिप्रदेशे भूभागे तत्र च रजतमये रौप्ये भाजने पात्रे स्थिते सति अकस्मादनाशङ्कि-तमेव देवो वर्षति, तन्मुक्ताफलं नागसम्भूतं ज्ञेयं ज्ञातव्यम्।।

अस्य च गुणानाह-

**अपहरति विषमलक्ष्मीं क्षपयति शत्रून् यशो विकाशयति।**

**भौजङ्गं नृपतीनां धृतकृतार्धं विजयदं च।।२७।।**

भौजङ्गं सार्पं सर्पमुक्ताफलम्। अकृतार्धमकृतमूल्यं राज्ञां नृपतीनां धृतं विषमलक्ष्मीं चापहरति। शत्रून् रिपून् क्षपयति। यशः कीर्तिं विकाश्यति। विजयदं च विजयं ददाति।।

अथ वेणुशङ्खोद्भजंग लक्षणमाह-

**कर्पूरस्फटिकनिभं चिपिटं विषमं च वेणुजं ज्ञेयम्।**

**शङ्खोद्भवं शशिनिभं वृत्तं भ्राजिष्णु रुचिरं च।।२८।।**

कर्पूरनिभं स्फटिकनिभं चिपिटं विषमं च तद्वेणुजं वेणुसम्भूतम्। शशिनिभं चन्द्रसदृशं वृत्तं परिवर्तुलं भ्राजिष्णुः भ्राजनशीलं रुचिरं तेजस्वि शङ्खोद्भव शङ्खलं ज्ञेयम्।।

अथैतेषां परिभाषज्ञानार्थमाह-

**शङ्खतिमिवेणुवारणवराहभुजगाभ्रजान्यवैद्यानि।**

**अमितगुणत्वाच्चैषामर्धः शास्त्रे न निर्दिष्टः।।२९।।**

शङ्खः प्राणि। तिमिर्मत्स्यः। वेणुर्वशः। वारणो हस्ती। वराहः सूकरः। भुजगः सर्पः। अभ्रं मेघः। एभ्यो यानि जातानि सम्भूतानि तान्यवेद्यानि न वेदनीयानि। एषां सर्वेषाममितगुणत्वाद्वहुगुणत्वाच्छास्त्रे अर्घो मूल्यंन निर्दिष्टो नोक्तः।।

एतेषां प्रशस्तार्थमाह-

**एतानि सर्वाणि महागुणानि सुतार्थसौभाग्ययशस्कराणि।**

**रुक्शोकहन्तॄणि च पार्थिवानां मुक्ताफलानीप्सितकामदानि।।३०।।**

एतानि सर्वाणि निःशेषाणि शङ्खादिसम्भूतानि मुक्ताफलानि महागुणानि प्रभूतगुणानि। सुता पुत्राः। अर्थो धनम्। सौभाग्यं सर्वजनप्रियत्वम्। यशः कीर्त्तिं कुर्वन्ति। पार्थिवानां राज्ञां रुक्शोकहन्तृणि, रुग् रोगः, शोको दुःखं हरन्ति, ईप्सितमभिलषितं काममिच्छां च ददति।।

अधुना मुक्तारचितानामभरणानां संज्ञा आह–

**द्वात्रिंशता तु गुच्छो विंशत्या कीर्तितोऽर्धगुच्छाख्यः।**

**षोडशभिर्माणवको द्वादशभिश्चार्धमाणवकः।।३१,३२, ३३।।**

**अन्तरमणिसंयुक्ता मणिसोपानं सुवर्णगुलिकैर्वा।**

**तरलकमणिमध्यं तद्विज्ञेयं चाटुकारमिति।।३४, ३५।।**

**एकावली नाम यथेष्टासङ्ख्या हस्तप्रमाणा मणिविप्रयुक्त।**

**संयोजिता या मणिना तु मध्ये यष्टीति सा भूषणविद्भिरुक्ता।।३६।।**

सूरभूषणं लतानामिति। अष्टाधिकसहस्त्रं लतानां चतुर्हस्तं चत्वारो हस्ता दीर्ध सूरभूषणं सुराणां देवानां भूषणमलङ्कारं तच्च क्रियते। तस्य नाम संज्ञा इन्दुच्छन्दः। तस्यैवेन्दुच्छन्दसोऽर्धेन दलेन पञ्चशतानि चतुरधिकानि लतानां द्विहस्तं च विजयच्छन्दः संज्ञम्। शतमष्टयुतमिति। अष्टयुत्तं शतं लतानां द्विहस्तं च हारः। एकयुताशीतिरेकाशी–तिर्लतानां द्विहस्तं च देवच्छन्दः। अष्टाष्टकोऽर्धहारः। अष्टाभिरष्टकैश्चतुः षष्टया लतानामर्धहारः। नवषट्कश्चतुष्पञ्चाशल्लता रश्मिकलापाख्यः।

द्वात्रिंशता त्विति। लतानां द्वात्रिंशता युक्तं गुच्छाख्यम्। विंशत्या लतानामर्धगुच्छाख्यः कीर्तित उक्तः। षोडशभिर्लताभिर्माणवकाख्यः। द्वादशभिर्लताभिरर्धमाणवकः। द्विहस्त इति सर्वत्रानुवृत्तिः।

मन्दरसंज्ञोऽष्टाभिरिति। अष्टाभिर्लताभिर्मन्दरसंज्ञः। पस्चभिर्लताभिर्हारफलकमिति उक्तं कथितम्। सप्तविंशतिर्मुक्ताफलानि हस्तप्रमाणां च नक्षत्रमालेति संज्ञा।

अन्तरमणिसंयुक्तेति। सैव लता हस्तप्रमाणा अन्तरे मध्ये मणिभिः संयुक्ता सुवर्णगुलिकैर्वा कनकगुलिकैरथवान्तरे संयुक्ता मणिसौपानसंज्ञम्। तदेव तरलकमणिमध्यम्। हेमनिबद्धो मणिस्तरलक–मणिः स मध्ये यस्य। तेन संयुक्तं चाटुकारमिति ज्ञेयम्।

एकावलीति। यथेष्टासङ्ख्या यथेष्टैर्मुक्ताफलैर्युक्ता हस्तप्रमाणा हस्तसम्मिता मणिभिर्वप्रयुक्ता रहिता एकावली नाम तस्याभवति। या तु यथेष्टसङ्ख्या हस्तप्रमाणा मणिना तु मध्ये संयोजिता जा भूषणविद्भिर्भूषणलक्षणज्ञैर्यष्टीत्युक्त कथिता।।

## ५. मरकतलक्षणाध्यायः

तल्लक्षणं प्रयोजनं चाह -

**शुकवंशपत्रकदलीशिरीषकुसुमप्रभं गुणोपेतम्।**

**सुरपितृकार्ये मरकतमतीव शुभदं नृणां विहितम्।।१।।**

यन्मरकतं शुकवंशपत्रसदृशं शुकपक्षसमवर्णं वंशपत्रसदृशं कदलीसदृशं श्यावपीतं शिरीष-कुसुमप्रभं शिरीषपुष्पतुल्यवर्णं श्वेतपीतं वा। एतेषामन्यतमवर्णोपेतं तच्च यदि गुणोपेतं बहुगुणम्। बहुगुणाः स्निग्धः प्रभानुलेपी स्वच्छोऽर्चिष्मानित्यादिकास्तैर्युक्तं तथाविधद्यं नृणां पुंसां सुरपितृकार्ये देवकार्ये पितृकार्ये वाऽतीवात्यर्थं शुभदं विहितमुक्तमिति।।